वर्षम्-३

अङ्कः-९

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५१११-१२ वैक्रमाब्दः २०६६-६७ आषाढ-कृष्ण ५ – आश्विन-कृष्ण ७ शकः १९३१-३२ जुलाई - सितम्बर २०१०



संस्कृतदिवसावसरे ग्रन्थान् लोकार्पयन्तः (वामतः) वाचस्पति-उपाध्यायः, त्रिलोकीनाथचतुर्वेदी, अनीताभटनागर जैन, गौतमबोसः राधावल्लभत्रिपाठी च



संस्कृतसप्ताहान्तर्गततया आयोजितस्पर्धानां पुरस्कारवितरण-कार्यक्रमे पुरस्कारान् प्रयच्छन् कुलपतिः राधावल्लभत्रिपाठी




गङ्गानाथझापरिसरे पाण्डुलिपिसंरक्षणकार्यशालायाः समापनसमारोहे मञ्चस्थाः (वामतः) जनार्दनपाण्डेयः, राधावल्लभत्रिपाठी, अभिराजराजेन्द्रमिश्रः, सुरेन्द्रझाश्च

## कुलपतिवाक्

सौन्दर्याणां निधानं कविवरवचसां सञ्चितं कीर्तिभाजाम्
बीजं कल्पद्रुमाणां जनजनमनसां काङ्क्षितस्यानुरूपम्।
पाथेयं ज्ञानराशेः प्रतियुगममलं जायमानं नवीनम्
सौभाग्यं सौख्यभूमिं प्रथयतु सततं पावनं संस्कृतं तत्।।

साहित्यस्य निधिं च जीवनविधिं या बिभ्रती शेवधिम्
प्राचीनां च परम्परां प्रतिनवां या कुर्वती प्रज्ञया।
स्रोतेभ्यश्च सहस्रशो बहुसृता पुण्यप्रवाहान्विता
सैषा संस्कृतवाङ्मयार्णवमहाधारा सदा पातु नः।।

मूलं वेदमयं पवित्रचरितं स्कन्धोऽस्य रामायणम्
नानादर्शनधर्मशास्त्रनिचयाः शाखास्तथा विस्तृताः।
काव्यानां स्तवकैः सदर्थकुसुमैर्युक्तो रसाढ्यैः फलैः
सोऽयं संस्कृतकल्पवृक्षमहिमा भूयात् प्ररोहान्वितः।।

इमे स्वोपज्ञा श्लोका मया ऐषमः संस्कृतदिवसमहोत्सवस्य मुख्ये कार्यक्रमे स्वागतं व्याहरता पठिताः। वस्तुतोऽभूतपूर्वः समुन्मीलति सम्प्रति संस्कृतस्य कृते सम्भावनानां संसारः। विश्वस्मिन्नपि विश्वे संस्कृतस्य नवाभ्युदयो जायते। प्रकाशनक्षेत्रे नवीनयान्त्रिकपद्धतिभिः संस्कृतवाङ्मयं सुरुचिरं विधाय दृश्यश्रव्यमाध्यमैः प्रस्तूयते। राष्ट्रियसंस्कृतसंस्थानेन शब्दकल्पद्रुमस्य महाकोशस्य ई-पाठः सी.डी. मध्ये स्थापितः। संस्कृतकल्पद्रुमः सम्प्रति दृढं प्ररूढ इत्यनुभवामः। शब्दकल्पद्रुमस्य ई-पाठः संस्थानेन निर्मापितः सम्प्रति समस्तसंसारस्य संस्कृतविद्वत्समाजे प्रशंसायाः पात्रं जात इति सूचयन्तो नितरां हर्षप्रकर्षमनुभवामः। अस्मिन्नेव महोत्सवे न केवलं अष्टौ महत्त्वपूर्णा ग्रन्थाः अपितु काचन विशिष्टा दृश्यश्रव्यसामग्री अपि राष्ट्रियसंस्कृतसंस्थानेन निर्मिता लोकार्पणार्थं सज्जीकृता, तत्त्वचिन्तामणिग्रन्थस्य सम्पूर्णस्य के.ई. देवनाथन्-महोदयानां प्रायः त्रिशतं होरात्मिका छात्रोपकारिणी सुबोधव्याख्या एम.पी.-३ इत्यनेन माध्यमेन प्रस्तुता लोकाय अर्पिता च। राष्ट्रियसंस्कृतसंस्थानस्य दृश्यजालं (वेब्साइट्) इदानीं यावत् आङ्ग्लभाषा-माध्यमेन हिन्दीभाषामाध्यमेन च सुलभमासीत्। अस्मिन् संस्कृतमहोत्सवे अस्य वेब्साइट् इत्यस्य संस्कृतरूपमपि उद्घाटितम्।

विजयादशम्याः दीपमालिकापर्वणश्च सर्वेभ्यो मङ्गलकामनाः वितरति-

*–राधावल्लभः त्रिपाठी*

**मुख्यपरामर्शदाता**

आचार्यः राधावल्लभः त्रिपाठी

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

आचार्यः रामानुजदेवनाथः, नवदेहली

प्रा. जि. गङ्गन्ना, पुरी

प्रा. विश्वमूर्तिशास्त्री, जम्मू

प्रा. आजादमिश्रः, भोपालम्

प्रा. प्रकाशपाण्डेयः, इलाहाबादम्

प्रा. के.टी. माधवन्, गुरुवायूरु

प्रा. अर्कनाथचौधरी, जयपुरम्

प्रा. ए.पि. सच्चिदानन्दः, शृङ्गेरी

प्रा. एम्.ए. बाबुः, मुम्बई

प्रा. सर्वनारायणझाः, लखनऊ

प्रा. के.वी. सुब्बारायुडु, गरली

**सम्पादकमण्डलम्**

डॉ. शुक्ला मुखर्जी

डॉ. रत्नमोहनझाः

कू. वेङ्कटेशमूर्तिः

प्रफुल्लगडपालः


'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**


# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

ISSN : 975

प्रकाशकः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058

011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in


## प्रतिवार्ता




सद्यः प्रकाशितायाः संस्कृतवार्तायाः मुखपुटं तु अत्यन्तं मनोरमं वर्तते। बहुवर्णयुतेयं पत्रिका अन्तःपरिसरेषु जायमानक्रियाकलापान् ज्ञापयन्ती अध्यापकेषु पाठ्यसहगामिक्रियाः कर्तुं नवोत्साहं जनयति। अद्य संस्थानाध्यापकेषु वार्तायाः माध्यमेन विविधान् कार्यक्रमान् कर्तुं भागं वोढुं च महती सक्रियता अवलोक्यते। इदृशवार्ता-प्रकाशनतत्परेयं पत्रिका जालपुटेऽपि दृश्यते। बृहत्तमसंस्कृतविश्वविद्यालयस्यास्य क्रिया-कलापाभिज्ञानं संस्थानेतरानपि सम्भवतीति कश्चन हर्षविषयः।

रमाकान्तमिश्रः, पुरीपरिसरः

## बुद्धजयन्तीव्याख्यानकार्यक्रमः सुसम्पन्नः

राष्ट्रियसंस्कृतसंस्थानस्य भारतीयदार्शनिक-अनुसन्धानपरिषदः च संयुक्ततत्त्वावधाने २५.०९.१० दिनाङ्के नवदेहलीस्थ-'इण्डिया इन्टरनेशनल् सेन्टर् अनेक्सी'-प्रेक्षागृहे प्रथमबुद्धजयन्ती-व्याख्यानकार्यक्रमः समायोजितोऽभूत्। सायं ६.०० वादने समारब्धस्यास्य कार्यक्रमस्य विषयः आसीत् "बुद्धस्य चिन्तनोच्चतायाः सर्वेक्षणम्" [Surveying the Himalayas of Buddha's Thought]। प्रमुखवक्तृरूपेण आक्सफोर्ड्-विश्वविद्यालयस्य संस्कृतस्य पूर्वाचार्यः प्रो. रिचर्ड् एफ्. गोम्ब्रिचवर्यः आसीत्। प्रो. गोदावरीशमिश्रः (भारतीयदार्शनिक-अनुसन्धानपरिषदः, सदस्यसचिवः) अभ्यागतानां विदुषां स्वागतं व्याहरन् परिचयात्मकम् अभिभाषणम् अकरोत्। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः आचार्यस्य राधावल्लभत्रिपाठिनः आध्यक्ष्ये कार्यक्रमोऽयं प्रवृत्तः। प्रो. रिचर्ड् एफ्. गोम्ब्रिच्वर्यः बुद्धजयन्तीव्याख्यानं प्रदत्तवान्। डा. मर्सी हेलन् (भारतीयदार्शनिक-अनुसन्धानपरिषद्) धन्यवादज्ञापनम् अकरोत्।



संस्कृतसप्ताहोत्सवे संस्कृतवार्तायाः पूर्वतन-अङ्कं लोकार्पयन्तः विद्वांसः

## महता वैभवेन आचरितः संस्कृतसप्ताहोत्सवः

राष्ट्रियसंस्कृतसंस्थानस्य विविधराज्येषु स्थितेषु परिसरेषु संस्थानमुख्यालये च ऐषमः संस्कृतसप्ताहोत्सवः २१.०८.१० तः २७.०८.१० पर्यन्तं महता वैभवेन समाचरितः। भारतशासनस्य निर्देशानुसारेण श्रावणपूर्णिमादिनं लक्ष्यीकृत्य ततः पूर्वं परञ्च कानिचन दिनानि सम्पूर्णेऽपि राष्ट्रे संस्कृतसप्ताहत्वेन परिपाल्यन्ते इति सर्वेऽपि जानन्ति एव। वस्तुतः अयम् अवसरः समेषामपि संस्कृतज्ञानां कृते उत्सवः एव। राष्ट्रियसंस्कृतसंस्थानस्य नवदेहलीस्थमुख्यालयेऽपि संस्कृतसप्ताहे विविधकार्यक्रमाः समायोजिताः कविसपर्या, विद्वत्सपर्या, शास्त्रचर्चा, संस्कृतदिवससमारोहः, विद्यालयीयच्छात्राणां कृते विविधस्पर्धाः पुरस्कारवितरणसमारोहश्च संस्कृतसप्ताहाङ्गत्वेन आयोजिताः अभवन्।



संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमे स्वागतभाषणं कुर्वन् कुलसचिवः रा. देवनाथः अन्ये विद्वांसश्च

### कविसपर्या विद्वत्सपर्या च

संस्कृतसप्ताहोत्सवस्य प्रथमे दिने २३.०८.१० दिनाङ्के शारदादेवीसंस्कृतमहाविद्यालयच्छात्रैः कृतेन मङ्गलाचरणेन कार्यक्रमोऽयं प्रारब्धः। मुख्यातिथेः अभिराजराजेन्द्रमिश्रस्य सत्कारानन्तरं संस्थानस्य कुलसचिवः आचार्यः रामानुजदेवनाथः स्वागतभाषणमकरोत्। अस्य कार्यक्रमस्य आध्यक्ष्यं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः राधावल्लभत्रिपाठिमहोदयः निर्व्यूढवान्। श्रीमता गङ्गेशोपाध्यायेन प्रणीतस्य समग्रस्य तत्त्वचिन्तामणिग्रन्थस्य श्रव्यसान्द्रमुद्रिका (DVD MP-3) तिरुपतिस्थ-के.ई. देवनाथस्य सहाय्येन राष्ट्रियसंस्कृतसंस्थानेन सज्जीकृता वर्तते। अस्याः सान्द्रमुद्रिकायाः श्रावणमपि कार्यक्रमेऽस्मिन् अभवत्। सरलरीत्या न्यायदर्शनस्य अवगमने सान्द्रमुद्रिकेयम् अतीव उपकारं विदधाति। उद्घाटनकार्यक्रमाङ्गतया कविसपर्या-कार्यक्रमे आचार्यः अभिराजराजेन्द्रमिश्रः संस्कृतस्य सजीवत्वं, महाराजदीनपाण्डेयस्य काव्ये व्यावहारिकपदानां प्रयोगः संस्कृतगज़ल-परम्परायां पाण्डेयवर्यस्य अवदानादिविषये स्वाभिप्रायं प्राकटयत्। तदनन्तरं कविवरमहाराजदीनपाण्डेयस्य काव्यमधिकृत्य चर्चासत्रं प्रवृत्तम्। आचार्यः हर्षदेवमाधवः 'काक्षेण वीक्षित'मिति ग्रन्थे, डा. बजरङ्गबिहारीतिवारी 'यक्षं प्रति' इति ग्रन्थे तथा च डा. नारायणदाश-डा. इच्छारामद्विवेदिनौ 'बीसवीं शताब्दी के संस्कृत-महाकाव्यों में राष्ट्रिय-चेतना' इति ग्रन्थे स्व-स्वविचारान् व्यक्तीकृतवन्तः। आचार्यहर्षदेवमाधवानुसारेण 'पाण्डेयवर्यस्य काव्येषु कारुण्यभावना मुदिता च विशिष्टया दरीदृश्यते।' डा. बजरङ्गबिहारीतिवारी स्वविचारं प्राकटयत् यत् 'महाराजदीनपाण्डेयवर्यस्य काव्येषु मानवीयभावनानाम् औनत्यं तदीयकाव्यस्य वैशिष्ट्यं वर्तते' इति। कविः महाराजदीनपाण्डेयः स्वीयसाहित्ययात्रायाः सङ्घर्षपूर्णमैतिह्यं सभायामुपस्थापयत्। सत्रान्ते राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठिवर्यः डा. महाराजदीनपाण्डेयस्य सम्मानं विधाय अध्यक्षभाषणमकरोत्। मुक्तस्वाध्यायपीठस्य निदेशकः डा. वाई.एस्.रमेशः कार्तज्ञ्यं ज्ञापितवान्।




विद्वत्सपर्याकार्यक्रमे भाषमाणः गयाचरणत्रिपाठी अन्ये विद्वांसश्च

अपराह्णे कुलपतिना आचार्यराधावल्लभत्रिपाठिना विद्वत्सपर्याकार्यक्रमे आचार्यकिशोरनाथझामहोदयस्य सम्मानः कृतः। शास्त्रचर्चासत्रेऽस्मिन् आचार्यः गयाचरणत्रिपाठी, आचार्यः के.ई. देवनाथः, आचार्यपीयूषकान्तदीक्षितः, आचार्यहरेरामत्रिपाठी, आचार्यनवीनहोल्लः, आचार्यगोदावरीशमिश्रः, आचार्यश्रीनिवासवरखेडी, आचार्यरामानुजदेवनाथः च हेत्वाभासविषये स्वीयविचारान् प्रस्तुतवन्तः। विविधशास्त्रपारङ्गतः उत्सवमूर्तिः आचार्यः किशोरनाथझामहोदयः कार्यक्रस्य आध्यक्ष्यं निरवहत्।



आचार्यकिशोरनाथझावर्यं सम्मानयन् कुलपतिः राधावल्लभत्रिपाठी

## संस्कृतदिवससमारोहः




संस्कृत-अन्तर्जालस्य लोकार्पणस्य किञ्चन दृश्यम्

२४.०८.१० दिनाङ्के संस्कृतसप्ताहस्य विशिष्टकार्यक्रमः 'संस्कृतदिवससमारोहः' नवदेहलीस्थ-राष्ट्रिय-सङ्ग्रहालये मानव-संसाधनविकासमन्त्रालयस्य, राष्ट्रियसंस्कृतसंस्थानस्य श्रीलालबहादुर-शास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य च संयुक्ततत्त्वावधाने प्रवृत्तः। अपराह्णे ३.३० वादने संवृत्तेऽस्मिन् कार्यक्रमे श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य विद्वद्भिः वैदिकमङ्गलाचरणं विहितम्। एतदनन्तरं तत्रत्यैः छात्रैः सरस्वती-वन्दना कृता। कार्यक्रमेऽस्मिन् कर्णाटकराज्यस्य पूर्वराज्यपालः श्रीत्रिलोकीनाथचतुर्वेदी अध्यक्षत्वेन, मानवसंसाधन-विकासमन्त्रालयस्य संयुक्तसचिवः (भाषा) डा. अनीता भटनागर जैनः मुख्यातिथित्वेन, राष्ट्रियसूचनाविज्ञानकेन्द्रस्य उपमहानिदेशकः डा. गौतमबोसः विशिष्टातिथित्वेन, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः आचार्यः वाचस्पत्युपाध्यायः मुख्यवक्तृत्वेन, राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठी, कुलसचिवः आचार्यरामानुजदेवनाथश्च उपस्थिताः आसन्। अतिथीनां सत्कारानन्तरं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठी स्वागतभाषणमकरोत्। मुख्यवक्तृत्वेन श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः आचार्यः वाचस्पति उपाध्यायः मुख्यभाषणं कथितवान्। अनन्तरं कार्यक्रमेऽस्मिन् श्रव्य-सान्द्र-मुद्रिकायाः (सामवेदस्य तत्त्वचिन्तामणेः च), राष्ट्रियसंस्कृतसंस्थानस्य संस्कृत-अन्तर्जालस्य (www.sanskrit.nic.in), ई-ग्रन्थस्य (मोग्गलानव्याकरणस्य), ई-ग्रन्थालयस्य नैकेषां ग्रन्थानां च लोकार्पणं सञ्जातम्। डा. अनीता भटनागर जैनमहोदया मुख्यातिथित्वेन भारतीयभाषाणां विकासे संस्कृतस्य महत्त्वभूतं योगदानमस्तीति उपस्थापयन्ती आधुनिकसञ्चारसाधनैः तकनीकीसाधनैश्च संस्कृताध्ययने ई-ग्रन्थस्योपयोगितां निरूपितवती। श्रीत्रिलोकीनाथचतुर्वेदिमहोदयः अध्यक्षभाषणे आधुनिकपरिप्रेक्ष्ये संस्कृतस्य महत्त्वं युक्तिपुरस्सरं प्रतिपाद्य संस्कृतप्रचारप्रसारयोः भारतशासनेन कृतस्य प्रयत्नस्य विवरणम् अकरोत्। राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः रामानुजदेवनाथवर्यः समागतेभ्यः विद्वद्भ्यः धन्यवादज्ञापनं कृतवान्। सामूहिकराष्ट्रगानेन संस्कृतदिवससमारोहोऽयं सम्पन्नतां गतः।




ई-ग्रन्थालय-उद्घाटनस्य किञ्चन दृश्यम्

## विद्यालयस्तरीयाः स्पर्धाः

अगस्तमासस्य २५-२६ दिनाङ्कयोः विद्यालयच्छात्राणां स्पर्धाः आयोजिताः। २५.०८.१० दिनाङ्के विद्यालयस्तरीया स्तोत्रपाठस्पर्धा भाषणस्पर्धा च समायोजिता। २६.०८.१० दिनाङ्के विद्यालयस्तरे निबन्ध-प्रतियोगिता आयोजिता स्पर्धायामस्यां छात्राणां द्वौ गणौ कनिष्ठवर्गः वरिष्ठवर्गश्च प्रतिभागिनौ आस्ताम्। विद्यालयीयच्छात्रेषु संस्कृतं प्रति अनुरागं वर्धयितुम् आयोजिताः एताः स्पर्धाः अतीव उत्साहप्रदायिन्यः आसन्।




कार्यक्रमे अध्यक्षीयभाषणं कुर्वन् श्रीत्रिलोकीनाथचतुर्वेदीवर्यः, अन्ये विद्वांसश्च

मु ख्या ल य वा र्ता

दिनद्वयव्यापिनि अस्मिन् कार्यक्रमे ६४ विद्यालयानां ५३० छात्रैः भागग्रहणपुरस्सरं स्वीयं संस्कृतपाटवं प्रकटीकृतम्। स्पर्धायामस्यां देहलीराज्यस्य पारम्परिकविद्यालयानाम् आधुनिकशिक्षाविद्यालयानां च छात्राः सोत्साहं भागं ग्रहीतवन्तः।



पुरस्कारवितरणसमारोहे पुरस्कारान् प्रयच्छन् पङ्कजचान्देवर्यः

### पुरस्कारवितरणसमारोहः

२६.०८.१० दिनाङ्के आयोजिते पुरस्कारवितरणसमारोहे मुख्यातिथित्वेन रामटेकस्थ-कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः पङ्कजचान्देवर्यः स्वकीयोपस्थित्या कार्यक्रमस्य शोभाम् अवर्धयत्। आचार्यपङ्कजचान्दे इदानीन्तनकाले संस्कृताध्ययनस्य आवश्यकतां प्रतिपाद्य स्पर्धायां विजयं प्राप्तवतः छात्रान् पुरस्कृतवान्। अध्यक्षीयभाषणे आचार्यराधावल्लभत्रिपाठी भविष्यति काले संस्कृतस्य सम्भावनाविषये स्वाभिप्रायं प्राकटयत्। राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः रामानुजदेवनाथः स्वागतवचोभिः सर्वेषां समागतानाम् अभिनन्दनं व्यवहृतवान्। संस्थानस्य उप-कुलसचिवः डा. गोपीरमणमिश्रः धन्यवादज्ञापनमकरोत्। इत्येवं राष्ट्रियसंस्कृतसंस्थानस्य सप्ताहव्यापी संस्कृतमहोत्सवः सोत्साहं सम्पन्नः।

## लोकार्पणम्

संस्कृतदिवसमहोत्सवे २४.८.१० दिनाङ्के लोकार्पिताः ग्रन्थादयः

◈ **ग्रन्थाः**

१. **IMPORTANCE OF NEPALESE SANSKRIT INSCRIPTIONS** (English-Hindi Translation) -Krishan Dev Agrawal 'Arvind'

२. पूर्णचन्द्रशास्त्रिकलावटियाप्रणीतं **प्रबुद्धभारतम्** - अनुवादिका सम्पादिका च दीक्षितपुष्पा

३. **भोजप्रबन्ध : एक काव्यशास्त्रीय अध्ययन** - सुधीरकुमारलालः

४. वी. बालसुब्रह्मण्यन्-विरचितं **चित्रम्** - भागः ३

५. उत्पलदेवप्रणीता **शिवस्तोत्रावली** (भारतीय भक्ति-परम्परा के विभिन्न आयामों के सन्दर्भ में) - सम्पादिका डा. सुषमा ज़ाडू जतू

६. हरियोगिकृतं **शाब्दिकाभरणम्** - सम्पादकः देवानन्दशुक्लः

७. श्री' काश्मीरिक 'सदानन्दयतिप्रणीतः **स्वरूपप्रकाशः** (सप्तदशशताब्द्यां विरचितऽद्वैतवेदान्तग्रन्थः) - सम्पादकः गयाचरणः त्रिपाठी

८. **संस्कृत-विमर्श**स्य नव शृङ्खलायाः चतुर्थः अङ्कः


संस्कृतदिवसे स्वरूपप्रकाशस्य लोकार्पणावसरे (वामतः) गयाचरणत्रिपाठी, वाचस्पत्युपाध्यायः त्रिलोकीनाथ चतुर्वेदी च

◈ **श्रव्य-सान्द्र-मुद्रिके (C.D.)**

१. सामवेदः

२. तत्त्वचिन्तामणिः

◈ **राष्ट्रियसंस्कृतसंस्थानस्य अन्तर्जालम् - संस्कृतसंस्करणम्**

www.sanskrit.nic.in

◈ **ई-ग्रन्थः**

मोग्गलानव्याकरणम्

◈ **ई-ग्रन्थालयः**

**अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः शमश्च।**
**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च॥**

—नीतिकल्पतरु, ९.९९

**उद्यमो मित्रवद् ग्राह्यः प्रमादं शत्रुवत् त्यजेत्।**
**उद्यमेन परा सिद्धिः प्रमादेन क्षयो भवेत्॥**

—बुद्धचरितम्, २६.७३



हिन्दीपक्षोत्सवकार्यक्रमे स्पर्धा-पर्यवेक्षणं कुर्वन्तः विद्वांसः

## समाचरितः हिन्दीपक्षोत्सवः

प्रतिवर्षानुसारम् अस्मिन्नपि वर्षे नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानमुख्यालये १४.०९.१० तः ३०.०९.१० पर्यन्तं हिन्दीपक्षोत्सवः आचरितोऽभूत्। एतस्य हिन्दीपक्षोत्सवस्य अङ्गतया १४.०९.१० दिनाङ्के संस्थानकुलपतेः आचार्यराधावल्लभत्रिपाठिवर्यस्य आध्यक्ष्ये हिन्दीदिवससमारोहः मानितः। कार्यक्रमेऽस्मिन् संस्कृतजगतः हिन्दीसाहित्यस्य च विशिष्टौ विद्वांसौ आचार्यरमाकान्तशुक्ल-आचार्य-श्रीधरवशिष्ठौ विशिष्टातिथित्वेन उपस्थितौ आस्ताम्। कार्यक्रमस्य अध्यक्षेन संस्थानकुलपतिना आचार्य-राधावल्लभत्रिपाठिमहोदयेन कालिदासप्रणीतस्य मेघदूतमिति गीतिकाव्यस्य स्वोपज्ञहिन्द्यनुवादस्य सस्वरपाठो विहितः। मेघदूतस्य अयं हिन्द्यनुवादः मूलहिन्दीकाव्यमिव आभासते स्म। यत्र खलु हिन्दीभाषायाः सामान्यसम्भाषणशब्दाः देशजशब्दाः च दरीदृश्यन्ते स्म। आङ्ग्लशैल्याः सोनेट्काव्यस्य रामणीयकता अस्मिन् अनूदितकाव्ये अनुभूयते स्म। कुलपतिवर्यः स्वीये भाषणे हिन्दीदिवसस्य प्रासङ्गिकतामपि प्रकाशितवान्।

**१४ सितम्बर, १० दिनाङ्के हिन्दीदिवससमारोहः मानितः**

आचार्यरमाकान्तशुक्लमहोदयोऽपि कालिदासविरचितरघुवंशमहाकाव्यस्य श्लोकानां हिन्द्यनुवादं संश्राव्य सर्वान् श्रोतॄन् आह्लादयत्। नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचरः आचार्यः श्रीधरवशिष्ठः राजभाषा-हिन्द्याः महत्त्वम् उपस्थापितवान्। कार्यक्रमसंयोजकः डा. अजयकुमारमिश्रः आचार्यराधावल्लभत्रिपाठिकृतसंस्कृतकाव्ययोः 'चूल्हा' तथा च 'कुत्ते की दुम' इति नाम्ना स्वोपज्ञं हिन्द्यनुवादं प्रास्तौत्। हिन्दीदिवससमारोहेऽस्मिन् मुक्तस्वाध्यायपीठस्य उपनिदेशकः डा. सच्चिदानन्दतिवारी कविप्रवरस्य भारतेन्दुहरिश्चन्द्रस्य काव्यानां श्रीप्रवीणरायश्च हरिवंशरायबच्चनस्य मधुशालेति काव्यस्य पाठम् अकुरुताम्। संस्थानस्य उपकुलसचिवः डा. गोपीरमणमिश्रमहोदयः धन्यवादं ज्ञापयत्।

हिन्दीपक्षोत्सवे संस्थानकर्मचारिणां कृते विविधस्पर्धाः आयोजिताः। आसु स्पर्धासु आहत्य ३९ कर्मचारिणः प्रतिभागितां ग्रहितवन्तः। सुलेख-टिप्पणप्रारूपण(Noting and Drafting)-श्रुतलेख-आशुभाषण-वादविवाद-प्रश्नमञ्च-स्वरचितकाव्यपाठ-हिन्दीगीतसङ्गीत-प्रभृतिस्पर्धाः हिन्दीपक्षोत्सवे समायोजिताः अभवन्। एतासु स्पर्धासु जेतृभ्यः एकचत्वारिंशे स्थापना-दिवसे १५.१०.१० दिनाङ्के पुरस्कारवितरणं करिष्यते इति सूचना हिन्दीपक्षोत्सवस्य समापनकार्यक्रमे प्रसारिताऽभवत्।

**उपलब्धिः**

## राष्ट्रियसंस्कृतसंस्थाने तदङ्गीभूतपरिसरेषु च ८०% कार्यं हिन्दीमाध्यमेन सम्पद्यते

भारतशासनस्य मानवसंसाधनविकासमन्त्रालयान्तर्गत-उच्चतरशिक्षा-विभागस्य राजभाषाप्रभागस्य (पत्रक्रमाङ्कः-सं. ११०११-१/२०१० रा.भा.ए. दिनाङ्कः २१ मार्च, २०१० इत्यनुसारेण) प्रसारित-अधिसूचनानुसारेण भारत-शासनमानवसंसाधनविकासमन्त्रालयाधीनमिदं राष्ट्रियसंस्कृतसंस्थानम् एतदङ्गीभूतपरिसराश्च तादृशसंस्थासु सम्मिलिताः अभवन् यासु ८०% ततोप्यधिकाः वा कर्मचारिणः हिन्द्याः कार्यसाधकं ज्ञानं धरन्ति हिन्दीमाध्यमेन च कार्यं सम्पादयन्ति। अधिसूचनेयं केन्द्रीयसर्वकारस्य राजभाषानियम-१९७६ इत्यस्य १० तमस्य नियमस्य चतुर्थ-उपनियमस्य अनुसरणानुसारेण प्रसारिताऽभवत्।

**शुभेच्छाः**

## सेवानिवृत्ताः

जुलाईतः सितम्बर् २०१० इत्यवधौ राष्ट्रियसंस्कृतसंस्थाने अधोनिर्दिष्टाः अधिकारिणः कर्मचारिणश्च सेवानिवृत्ताः अभवन् –

| नाम | परिसरः | तिथिः |
|---|---|---|
| आचार्यः आर्.एन्.दासः | गरलीपरिसरः | ३१.०७.१० |
| श्रीमती रेणुमल्होत्रा (कनिष्ठ-व्याख्यात्री) | जम्मूपरिसरः | ३१.०७.१० |
| डा.एम्.के.मारवाहः (शोध-सहायकः) | जम्मूपरिसरः | ३१.०७.१० |
| श्रीसोहनपालः (अनुभागाधिकारी) | संस्थानमुख्यालयः | ३१.०८.१० |
| श्रीदीवानचन्दः (उपकुलसचिवः, प्रशा.) | संस्थानमुख्यालयः | ३०.०९.१० |

संस्थानपरिवारः एतेषां सुखद-जीवनस्य शुभेच्छाः प्रकटयति।

**अभिवर्धन्ताम्**

## प्रोन्नताः कर्मचारिणः

राष्ट्रियसंस्कृतसंस्थाने जुलाईतः सितम्बर्-२०१० इत्यवधौ अधोलिखिताः कर्मचारिणः प्रोन्नताः अभवन्-

**कार्यालयसहायकाः अनुभागाधिकारित्वेन प्रोन्नताः**

१. श्रीमङ्गतसिंहः
२. श्रीजयसिंहः

**वरिष्ठलिपिकाः कार्यालयसहायकत्वेन प्रोन्नताः**

१. श्री डी.पी. पटनायकः
२. श्रीराजेशमिश्रः
३. श्री एस्.के. मुद्गलः
४. श्रीमती उर्मिलातिवारी
५. श्री के.टी. कृष्णन् कुमारः
६. श्रीरामवीरः
७. श्रीमती गङ्गाशर्मा
८. श्रीराजीवकुमारमिश्रः

**कनिष्ठलिपिकाः वरिष्ठलिपिकत्वेन प्रोन्नताः**

१. श्री बी.के. मौर्या
२. श्रीमती अनीतारानी
३. श्रीप्रमोदकुमारः

०३-०७.०७.१० भारतीयतात्त्विकपरम्परायां सङ्गणकीयागम-परियोजनायाः (Computational Approach to Indian Analytic Tradition Project) परिचर्चायां भागग्रहणं एवञ्च हैदराबादनगरे जीवनविद्याकार्यशालायां भागग्रहणम्।

०८.०७.१० शास्त्रिभवने उज्जैनस्थ-महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य शासी-परिषदः उपवेशने भागग्रहणम्।

१९.०७.१० संस्कृतविमर्शशोधपत्रिकायाः सम्पादकमण्डलस्य उपवेशने आध्यक्ष्यम्।

२०.०७.१० नवदेहलीस्थ-राष्ट्रियपाण्डुलिपिमिशन-द्वारा समायोजिते पाण्डुलिपिसंरक्षणकार्यशालायाः समापनकार्यक्रमे आध्यक्ष्यम्। इलाहाबादस्थ-गङ्गानाथझापरिसरस्य प्रकाशनसमितेः उपवेशने आध्यक्ष्यम्।

२१.०७.१० न्यायमूर्तिवेङ्कटाचलय्यावर्यस्य आध्यक्ष्ये राष्ट्रपतिसम्मानसम्बद्ध-पूर्वचयन-समितेः उपवेशने उपस्थितिः।

२४-२५.०७.१० करतारपुरस्थ-श्रीगुरुविरजानन्दमहाविद्यालयेन गुरुपूर्णिमावसरे समायोजिते कार्यक्रमे मुख्यातिथित्वेन उपस्थितिः।

३१.०७.१० सागरस्थ-डा. हरिसिंहगौरविश्वविद्यालयस्य संस्कृतविभागेन समायोजिते पाण्डुलिपिसंसाधनकेन्द्रस्य वार्षिकोत्सवे मुख्यातिथित्वेन विशिष्टव्याख्यानम्।

०२.०८.१० आदर्शसंस्कृतमहाविद्यालययोजनाविषये मानवसंसाधनविकासमन्त्रालयस्य संयुक्तसचिवेन (भाषा) सह उपवेशने उपस्थितिः।

०५.०८.१० संस्थानमुख्यालये शोधसहायकानां ए.सी.पी. उपवेशने आध्यक्ष्यम्।

०७.०८.१० जनकपुर्यां सनातनधर्ममन्दिरे पुरस्कारवितरणकार्यक्रमे मुख्यातिथित्वम्।

०८.०८.१० भोपालपरिसरे संस्कृतविद्वत्परिचायिकेति परियोजनायाः सम्पादकमण्डलस्य उपवेशने आध्यक्षम्। भोपालस्थ-महर्षि-अगस्त्य-वैदिक-संस्थानस्य साधारणसभायाः उपवेशने उपस्थितिः।

०९.०८.१० संस्थानमुख्यालये वरिष्ठशोध-अध्येतृ-कनिष्ठशोध-अध्येतृपदानां साक्षात्कारे आध्यक्ष्यम्।

१२.०८.१० कोलकातास्थ-जादवपुरविश्वविद्यालये सौन्दर्यशास्त्रविषयिण्यां राष्ट्रिय-सङ्गोष्ठ्यामुद्घाटनसत्रे भाषणम्।

१४.०८.१० नागपुरे आचार्य-जी. टी. देशपाण्डे-जन्मशताब्द्यवसरे ग्रन्थलोकार्पणकार्यक्रमे मुख्यातिथित्वम्। संस्कृतभाषाप्रचारिणीसभायाः सभाप्रकोष्ठस्य उद्घाटनावसरे मुख्यातिथित्वम्।

१६-१७.०८.१० कुञ्जुन्नी-राज-भारतशास्त्रशोध-अकादमीद्वारा 'राजप्रभा-पुरस्कारः २०१०' इत्यनेन पुरस्कृतः। कालडीस्थ-श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयस्य संस्कृतसाहित्यविभागेन 'अभिनवगुप्तस्य दार्शनिकं काव्यशास्त्रीयं च योगदानम्' इति विषयमाधृत्य आयोजितायाः राष्ट्रियसङ्गोष्ठ्याः उद्घाटनम्। वेलीयान्नाडुस्थ-सी.आई.एफ.-शोधसंस्थाने शोधप्रविधिः AYUSH परियोजना चेति विषयिण्याः कार्यशालायाः समुद्घाटनम्।

२२.०८.१० नवदेहल्यां सांस्कृतिककेन्द्रे 'कलानाम् अन्तः सम्बन्धः' विषयककार्यशालायां व्याख्यानम्।

२४.०८.१० नवदेहलीस्थ-राष्ट्रियसंग्रहालये संस्कृतसप्ताहमहोत्सवस्य अङ्गभूतस्य संस्कृतदिवससमारोहस्य समायोजनं स्वागतभाषणञ्च।

२६.०८.१० राष्ट्रियसंस्कृतसंस्थानमुख्यालये संस्कृतसप्ताहमहोत्सवस्य समारोपकार्यक्रमे आध्यक्ष्यम्।

२७.०८.१० संस्थानमुख्यालये परियोजना-अध्येतृ-पदस्य साक्षात्कारे आध्यक्ष्यम्।

३०.०८.१० 'प्राच्यभारतीयवैज्ञानिकपरम्परा' इति विषयमाधृत्य एफ.एस.आई. इत्यत्र भारतीयविदेशसेवापरीक्षणे व्याख्यानम्।

०१.०९.१० त्रिपुराप्रदेशे परिसरसंस्थापनार्थं प्रस्तावितस्य भूखण्डस्य निरीक्षणम्।

०४.०९.१० जयपुरे राजगङ्गा-चेरिटेबल्-ट्रस्ट्-संस्थया समायोजिते डा. गङ्गाधरभट्टजयन्ती-कार्यक्रमे व्याख्यानम्।

०६.०९.१० केन्द्रीयलोकनिर्माणविभागस्य कर्मचारिभिः सह भोपालपरिसरस्य निर्माणकार्यसम्बद्ध-उपवेशने भागग्रहणम्। भोपालपरिसरे डा. राधाकृष्णन्-स्मृति- व्याख्यानमालाकार्यक्रमस्य आध्यक्ष्यम्।

१०.०९.१० संस्थानमुख्यालये साक्षात्कारे आध्यक्ष्यम्।

११.०९.१० हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कार्यपरिषदः १२ तमे उपवेशने भागग्रहणम्।

१२.०९.१० नवदेहलीस्थे मालवीयभवने संस्कृतफाउण्डेशन्-द्वारा आयोजिते संस्कृतविश्वविद्यालयानां कुलपतीनां सम्मेलने एकस्मिन् सत्रे आध्यक्ष्यम्।

१३.०९.१० शैक्षिकपरिषदः उपसमिति-उपवेशने उपस्थितिः।

१७.०९.१० इन्दौरे उज्जयिनीस्थ-कालिदाससंस्कृत-अकादम्या समायोजिते संस्कृतनाट्यमहोत्सवे मुख्यातिथित्वम्।

२०.०९.१० संस्थानमुख्यालये वित्तीयपरामर्शदातृपदस्य चयनसमितेः उपवेशने आध्यक्ष्यम्।

२२.०९.१० राष्ट्रियसंस्कृतसंस्थानस्य छात्रवृत्तिसमितेः समालोचनम्।

२५.०९.१० नवदेहल्यां अनेक्स्-प्रेक्षागृहे भारतीयदार्शनिक-अनुसन्धानपरिषदः राष्ट्रियसंस्कृतसंस्थानस्य च संयुक्ततत्त्वावधाने समायोजिते बुद्धजयन्ती- व्याख्यानकार्यक्रमे आध्यक्ष्यम्।

२७.०९.१० बेङ्गलुरुनगरस्य विश्वसंस्कृतपुस्तकमेलकविषयके उपवेशने आध्यक्ष्यम्।

३०.०९.१० वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य चयनसमितेः उपवेशने भागग्रहणम्।

## संस्थानविदुषां क्रियाकलापाः/उपलब्धयः

- **प्रो. हरेकृष्णमहापात्रः** (व्याकरणविभागाध्यक्षः, पुरीपरिसरः) – श्रीपुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानेन अक्टूबरमासस्य ०२,०३ दिनाङ्कयोः आयोजितायां राष्ट्रियसंगोष्ठ्यां विषयविशेषज्ञरूपेण भागभाजः अभूत्।
- **डा. सुकान्तकुमारसेनापतिः** (सर्वदर्शनविभागाध्यक्षः, पुरीपरिसरः) – तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य पारम्परिकशास्त्राध्ययन-समुत्कर्षकेन्द्रद्वारा श्रीजगन्नाथसंस्कृतविश्वविद्यालये ०९.०९.२०१० तः १३.०९.२०१० पर्यन्तं समायोजितायां पञ्चदिनात्मिकायां संस्कृत-स्वाध्याय-साधन-सामग्री-निर्माणकार्यशालायां विषयविशेषज्ञरूपेण भागमगृह्णात्।
- **डा. रमाकान्तमिश्रः** (शिक्षाशास्त्रिविभागस्य सहाचार्यः, पुरीपरिसरः) – तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य पारम्परिकशास्त्राध्ययन-समुत्कर्षकेन्द्रद्वारा श्रीजगन्नाथसंस्कृतविश्वविद्यालये ०९.०९.२०१० तः १३.०९.२०१० पर्यन्तं समायोजितायां पञ्चदिनात्मिकायां संस्कृत-स्वाध्याय-साधन-सामग्री-निर्माणकार्यशालायां विषयविशेषज्ञरूपेण भागमग्रहीत्। श्रीपुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानेन अक्टूबरमासस्य ०२, ०३ दिनाङ्कयोः आयोजितायां राष्ट्रियसंगोष्ठ्याम् 'अहो मीरायाः भक्तिभावना' इति विषयं समुपस्थापयत्।
- **डा. महेशझाः** (न्यायविभागस्य सहाचार्यः, पुरीपरिसरः) – श्रीपुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानेन अक्टूबरमासस्य ०२, ०३ दिनाङ्कयोः आयोजितायां राष्ट्रियसंगोष्ठ्यां 'श्रीमद्भागवतरहस्यम्' इति निबन्धमुपस्थापयत्। सितम्बर्-मासस्य २४, २५, २६ दिनाङ्केषु परिसरे एव आयोजिते अन्ताराष्ट्रियालोचनाचक्रे भागग्रहणपुरस्सरं 'न्यायाभिमतः आत्मतत्त्वविमर्शः' इति निबन्धं समुपस्थापयत्।
- **आनन्दकुमारजैनः** (कनिष्ठशोध-अध्येता, जयपुरपरिसरः) – काशी-हिन्दू-विश्वविद्यालयस्य जैनबौद्धदर्शनविभागात् डा. अशोक-कुमारजैनस्य मार्गदर्शने 'चामुण्डरायकृत-चारित्रसारस्य समीक्षात्मकं तुलनात्मकं च अध्ययनम्' इति विषयमाधृत्य जयपुरपरिसरस्य प्राकृत-अध्ययनशोध- केन्द्रस्थ-कनिष्ठशोध-अध्येता आनन्दकुमारजैनः विद्यावारिधिः (Ph.D.) इति शोधोपाधिं लब्धवान्।

## राष्ट्रिय-प्राकृत-पाण्डुलिपि-शिक्षण-कार्यशाला सम्पन्ना



कार्यशालायां भागं गृहीतवन्तः प्रतिभागिनः विद्वांसश्च

**प्राकृतपाण्डुलिपिशिक्षणसम्बद्धेयं प्रथमा कार्यशाला आसीत्**

राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरस्य प्राकृताध्ययनशोधकेन्द्रे जुलाईमासस्य १९ तः २५ दिनाङ्कपर्यन्तमेका राष्ट्रियप्राकृतपाण्डुलिपि-शिक्षणकार्यशाला समायोजिता। कार्यशालेयं प्राकृतपाण्डुलिपीनां परिचय-पठन-सम्पादन-अभ्यासानां कृते प्रवर्तिता। कार्यशालायामस्यां देशस्य गुर्जर-महाराष्ट्र-राजस्थान-मध्यप्रदेश-उत्तरप्रदेश-कर्णाटक-दिल्ली-प्रान्तेभ्यः ३९ प्रतिभागिनः समवेताः अभूवन्। १९.०७.१० दिनाङ्के कार्यशालायाः उद्घाटनं सुप्रसिद्धप्राकृत-भाषाविदः प्रो. कमलचन्द्रसोगानी-महाभागस्य करकमलाभ्यां समभवत्। परिसरीयजैनदर्शनविभागाध्यक्षः प्रो. श्रीयांसकुमारसिंघईमहोदयः समेषामतिथीनां स्वागतं व्याहरन् पाण्डुलिपिशिक्षणस्य माहात्म्यं प्रख्यापितवान्। आध्यक्ष्यं निर्वहन् परिसरप्राचार्यः प्रो. अर्कनाथ-चौधरीवर्यः प्रावोचत् यत् 'सर्वे प्रतिभागिनः कार्यशालानिकषं प्राप्य संस्कृते आधारभूतमातृकाणां संरक्षणे सम्पादनेऽनुवादे च तत्पराः भवेयुः।' धन्यवादज्ञापनं कुर्वता प्रो. वासुदेवशर्ममहाभागेन पाण्डुलिपिशिक्षणस्य साफल्यमुद्घोषितम्।

एतस्याः कार्यशालायाः सम्पूर्तिसमारोहः २५.०७.१० तमे दिनाङ्केऽवर्तत। एतस्मिन्नवसरे राष्ट्रपतिसम्मानित-मनीषी प्रो. दयानन्द-भार्गवमहोदयः मुख्यातिथिपदमलङ्कुर्वन् अवदत् यत् "'प्राकृतसाहित्ये णमोलोएसव्वाहूणं' इति वचनं सर्वथा सार्वभौमकथनं वर्तते। वचनेऽस्मिन् कस्यापि जातिसम्प्रदायगुर्वादीनां व्यक्तिशः उल्लेखो नास्ति। भारतीयसंस्कृतौ साम्प्रदायिकनिरपेक्षतां स्थापयितुं प्राकृतवाङ्मयमेव समर्थम्" इति। तदनन्तरं मुख्यवक्त्रीपदे शोभमाना डा. सुषमासिंघवीमहोदया पाण्डुलिपीनां महत्त्वं प्राकटयत्। कार्यक्रमान्तेऽऽध्यक्षीयोद्बोधने प्रो. अर्कनाथचौधरीमहोदयः अवदत् यत् 'प्राकृतवाङ्मये विद्यमानभारतीयविद्यातत्त्वानि उद्भावनीयानि तथा च प्राकृतसाहित्यं साम्प्रदायिकवृत्ततो बहिः निष्कासनीयम्' इति। डा. कमलेशकुमारजैनः स्वागतवचांस्यभाषत। डा. रमाकान्तपाण्डेयमहोदयेन च कार्तज्ञवचनानि प्रकटितानि। कार्यशालायाः निर्देशकः परिसरप्राचार्यः अर्कनाथचौधरी संयोजकश्च डा. धर्मेन्द्रजैनः आस्ताम्। आगामिसमयेऽस्मात् केन्द्रादाचार्योपाधिप्राप्तसंस्कृतज्ञानां प्राकृतविषये एम.ए. इत्युपाधिप्राप्तानाञ्च कृते द्विसाप्ताहिकी प्राकृतभाषाशिक्षणकार्यशालाऽऽयोक्ष्यते। एतस्मिन्केन्द्रेऽधुना प्राकृतभाषासम्बन्धिन्योऽनेकाश्शोधपरियोजनाः सञ्चलन्ति।




उद्घाटनसमारोहस्य किञ्चन दृश्यम्

## पाण्डुलिपिसंरक्षणकार्यशालायां मातृकासंरक्षणोपायाः अध्यापिताः

राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः) नवदेहली राष्ट्रियपाण्डुलिपिमिशन, नवदेहली चेत्याभ्यां संस्थाभ्यां १६ जुलाई, २०१० तः २० जुलाई, २०१० पर्यन्तं संस्थानस्य इलाहाबादस्थ-गङ्गानाथझापरिसरे पाण्डुलिपिसंरक्षणकार्यशाला समायोजिता। १६ जुलाई, २०१० दिनाङ्के प्रातः १०.०० वादने अस्याः कार्यशालायाः उद्घाटनसत्रं प्रवृतम्। मुख्यातिथित्वेन श्रीमती उषा अग्रवालवर्या (पूर्वनिदेशिका, आई. सी. सी. आई., लखनऊ) तथा च विशिष्टातिथित्वेन श्रीमती ममता मिश्रा (निदेशिका, इन्टाक, भारतीयसंरक्षणसंस्थानम्, लखनऊ) उपस्थिते आस्ताम्। प्रशिक्षणार्थिनः भिन्न-भिन्नसत्रेषु पाण्डुलिपिविज्ञानसम्बद्धान् विषयान् ज्ञातवन्तः।

२० जुलाई, २०१० दिनाङ्के कार्यशालेयं समाप्तिं गता। सायं ४.०० वादनतः अस्याः कार्यशालायाः समापनसत्रं प्रवृत्तम्। समापनसत्रेऽस्मिन् अध्यक्षत्वेन राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठि-महोदयः, आचार्यः अभिराजराजेन्द्रमिश्र-महोदयश्च विशिष्टातिथित्वेन आस्ताम्। अस्य पाण्डुलिपिसंरक्षणकार्यशाला-उपक्रमस्य संयोजकौ आचार्यः सुरेन्द्रझाः (प्राचार्यः, गङ्गानाथझापरिसरः इलाहाबाद्) डा. शुक्ला मुखर्जी (परियोजनाअधिकारी, राष्ट्रियसंस्कृतसंस्थानम्) च आस्ताम्।

## सम्मानितः कुलपतिवर्यः

**सम्मानः**

जयपुरस्थ-राजगङ्गा-चेरिटेबल्-ट्रस्ट् इत्याख्यया संस्थया ०४.०९.१० दिनाङ्के स्व. डा. गङ्गाधरभट्ट-स्मृतिसमारोहे शुभाभिनन्दनपत्रेण कुलपतिः आचार्यराधावल्लभत्रिपाठिमहोदयः सम्मानितः।

**राजप्रभापुरस्कारः २०१०**

कुञ्जुन्नी-राज-भारतशास्त्रशोध-अकादमीद्वारा 'राजप्रभा-पुरस्कारः २०१०' इत्यनेन सम्मानितः।

## अभिनन्दनानि

**संस्थानतः विद्यावारिधि (Ph.D.)-उपाधिमधिगताः विद्वांसः**

जुलाईतः सितम्बर् २०१० इत्यवधौ राष्ट्रियसंस्कृतसंस्थानस्य (मानितविश्वविद्यालयस्य) विविधपरिसरेभ्यः तत्तद्विषयेषु तत्तच्छोधमार्ग-दर्शकानां सहाय्येन निम्नोक्तशोधविद्वांसः विद्यावारिधिः (Ph.D.) इति उपाधिम् अधिगतवन्तः-

१. एल्.एस्. वादिराजाचार्यः, २. एस्.एन्. प्राणेशः, ३. द्वारकाप्रसाद-शर्मा, ४. सूर्यकान्तझाः, ५. श्रीजा के.पी. ६.सुन्दरसिंहपरिहारः च।

## २०१०-११ तमे वर्षे संस्थानपरिसरेषु प्रविष्टानां छात्राणाम् सङ्ख्यावलिः*

| क्र. | परिसरनाम | प्राक्शास्त्री | | शास्त्री | | | आचार्य | | शि.शा. | शि.आ. | योगः |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | I | II | I | II | III | I | II | | | |
| १. | गरलीपरिसरः | २४ | २३ | ३८ | ६७ | ६८ | २१ | २४ | – | – | २६५ |
| २. | श्रीरणवीरपरिसरः | ६७ | २३ | ६७ | ४५ | ३४ | ११ | १४ | ९६ | १७ | ३७४ |
| ३. | गुरुवायूरुपरिसरः | ४४ | ४० | २८ | ४८ | ४७ | ४६ | २५ | १०० | – | ३७८ |
| ४. | राजीवगान्धीपरिसरः | ५३ | ३९ | ३६ | ३६ | २९ | ३५ | ४० | १०० | – | ३६८ |
| ५. | के.जे. सौमेया-विद्यापीठम् | ०४ | ०२ | ०४ | ०७ | ०४ | ०३ | ०१ | ५५ | – | ८० |
| ६. | भोपालपरिसरः | ३४ | १८ | ५७ | १९ | ३६ | ३४ | २४ | १०० | – | ३२२ |
| ७. | श्रीसदाशिवपरिसरः | ६४ | ५१ | ६० | ५९ | ४९ | १७० | १४० | १०० | – | ६९३ |
| ८. | जयपुरपरिसरः | ६९ | ४९ | १८० | १४३ | ९९ | ९८ | ५२ | ९९ | २८ | ८१७ |
| ९. | लखनऊपरिसरः | २२ | ०५ | २५ | १९ | १२ | ३० | २५ | १०४ | – | २४२ |
| | **आहत्यच्छात्रसंख्या** | **३८१** | **२५०** | **४९५** | **४४३** | **३७८** | **४४८** | **३४५** | **७५४** | **४५** | **३५३९** |

* संख्येयं परिवर्तिता भवितुमर्हति।

# परिसरेषु समनुष्ठितः संस्कृतसप्ताहमहोत्सवः




पुरस्कारप्राप्तच्छात्रैः सह सुशीलकुमारः, राजकरणसिंहः सर्वनारायणझाश्च

## लखनऊ-परिसरे

प्रतिवर्षमिव लखनऊपरिसरे ऐषमः त्रि-दिवसीयः संस्कृतमहोत्सवः महता उत्साहेन २३ तः २५ अगस्त्, २०१० मिते काले समनुष्ठितः। संस्कृतमहोत्सवस्यास्य उद्घाटनसमारोहे २३.०८.२०१० दिनाङ्के पूर्वाह्ने ११.०० वादने उत्तरप्रदेशविधानसभाध्यक्षः श्रीसुखदेवराजभरवर्यः आध्यक्ष्यं निर्व्यूढवान्। पूर्वमन्त्री प्रतिनिहितविधानसमितेः सभापतिः श्रीमोहम्मद-इरशादखाँ-वर्यः विशिष्टातिथित्वेन उपस्थितः आसीत्। परिसरच्छात्रैः विहितवैदिकलौकिकमङ्गलाचरणैः कार्यक्रमोऽयं समारब्धः। परिसरप्राचार्यः प्रो. सर्वनारायणझावर्यः स्वागतभाषणम् अकरोत्। स्वीये अध्यक्षीयभाषणे श्रीसुखदेवराजभरमहोदयः अकथयत् यत् 'समाजे बहवः छात्राः निरुत्साहिनः सन्तः आत्महननं कुर्वन्ति। तान् छात्रान् संस्कृतवाङ्मयमेव आदर्शं सन्तुलितञ्च मार्गं बोधयितुं शक्नोतीति।' प्रो. बटोहीझामहोदयः धन्यवादं ज्ञापितवान्। डा. लक्ष्मीनिवासपाण्डेयवर्यः उद्घाटनसत्रस्यास्य सञ्चालनम् अकरोत्। डा. भारतभूषणत्रिपाठिवर्यस्य सञ्चालने अपराह्ने २.०० वादने परिसरच्छात्राणां कृते शास्त्रीयभाषणस्पर्धाः समायोजिताः आसन्।

२४.०२.१० दिनाङ्के सामान्यसम्भाषणस्पर्धाः सम्पन्नाः अभूवन्। एतासां स्पर्धानां सञ्चालनं डा. गणेशशङ्करविद्यार्थिवर्यः अकरोत्।

२५.०८.२०१० दिनाङ्के पूर्वाह्ने १०.३० वादने स्थानीयविद्यालयीयच्छात्राणां कृते प्रतियोगिताद्वयं 'श्लोकपाठः गीतापाठश्च' आयोजितमभवत्। अपराह्ने १.०० वादने श्रीकुलदीपशर्मवर्यस्य सञ्चालने श्लोकपाठ-गायन-नृत्यादिस्पर्धाः सम्पन्नतां गताः। अपराह्ने २.०० वादने संस्कृतमहोत्सवस्यास्य समापनसत्रे पूर्वसांसदः वयोवृद्धः श्रीराजकरणसिंहमहोदयः आध्यक्ष्यं निर्व्यूढवान्। मुख्यातिथित्वेन सम्प्राप्तः उत्तरप्रदेशशासनस्य प्रमुखसचिवः श्रीसुशीलकुमारवर्यः स्वीये उद्बोधने संस्कृताध्ययनस्य अङ्गीभूतानां वैदिकगणित-श्रीमद्भगवद्गीता-दिविषयाणां वैज्ञानिकत्वं प्रतिपादयत्। समापनकार्यक्रमेऽस्मिन् विविधस्पर्धासु जेतारः स्पर्धालवः पुरस्कारैः सभाजिताः अभवन्। प्राचार्यः प्रो. सर्वनारायणझाः अभ्यागतानां सर्वेषां स्वागतम् अकरोत्। कार्यक्रमसंयोजकः डा. लक्ष्मीनिवासपाण्डेयः धन्यवादं ज्ञापितवान्। डा. धनीन्द्रझामहोदयः समापनसत्रस्य सञ्चालकः आसीत्।

## गरलीपरिसरे

हिमाचलप्रदेशस्थ-गरलीपरिसरे २१.०८.१० तः २७.०८.१० पर्यन्तम् ऐषमः संस्कृतसप्ताहसमारोहः प्रतिवर्षमिव समुत्साहपूर्वकं सम्पन्नः। संस्कृतसप्ताहस्य अङ्गीभूतमुख्यकार्यक्रमस्य समारम्भः २५.०८.१० दिनाङ्के सञ्जातः। २५.०८.१० दिनाङ्के तावत् त्रयाणि सत्राणि प्रवृत्तानि। पूर्वाह्ने १०.०० वादने कार्यक्रमस्य निर्विघ्नसमाप्तये प्रथमसत्रे सरस्वतीपूजनं जातम्। द्वितीये च सत्रे उद्घाटनकार्यक्रमः प्रवृत्तः। अस्मिन् द्वितीये सत्रे कुरुक्षेत्रविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः भीमसिंहः वेदालङ्कारः मुख्यवक्तृरूपेण उपस्थितोऽऽसीत्। सत्रस्यास्य आध्यक्ष्यम् आचार्यरामनारायणदासः निर्व्यूढवान्। डा. राधावल्लभशर्मा अस्य सत्रस्य सञ्चालनम् अकरोत्। तृतीये सत्रे आचार्यरामनारायणदासस्य आध्यक्ष्ये आचार्यभीमसिंहवेदालङ्कारस्य निर्णायकत्वे च विविधस्पर्धाः प्रचलिताः। वृत्तविशेषान् आधृत्य प्रवृत्तां श्लोकोच्चारणस्पर्धाम् आचार्यनन्दकिशोरतिवारीवर्यः सञ्चालितवान्। पाणिनीयाष्टाध्यायी-सूत्रान्त्याक्षरीम् आचार्यसुबोधशर्म-विजयपालशास्त्रिणौ सञ्चालितवन्तौ। ''दशपुत्रसमो द्रुमः'' इति विषयमाधृत्य लघुनिबन्धप्रतियोगिता आचार्य-उमेशचन्द्रमिश्रस्य सञ्चालकत्वे सम्पन्नतां गता।

२६.०८.१० दिनाङ्के चतुर्थे सत्रे प्राक्-शास्त्रिच्छात्राणां कृते अनुक्रम-व्युत्क्रम-गणनास्पर्धाऽभवत्। अनन्तरं भाषणप्रतियोगिता श्लोकान्त्याक्षरी-प्रतियोगिता च सुसम्पन्ना। परिसरप्राचार्यस्य आचार्यप्रकाशपाण्डेयस्य आध्यक्ष्ये उमेशकुमारपाण्डेयस्य च सञ्चालकत्वे भाषणप्रतियोगिता प्रवृत्ता। अस्याः प्रतियोगितायाः निर्णायकरूपेण आचार्यमदनमोहनपाठकः, आचार्यविजयपालशास्त्री आचार्यसुबोधशर्मा च आसन्। अन्ते च श्लोकान्त्याक्षरी-प्रतियोगिता अभवत्।

संस्कृतोत्सवस्यास्य तृतीये दिवसे २७.०८.१० दिनाङ्के पञ्चमे सत्रे समस्यापूर्तिः प्रश्नमञ्चः चेति स्पर्धाद्वयं प्रवृत्तम्। षष्ठे सत्रे संस्कृतसप्ताहसमापनसमारोहे पुरस्कारघोषणा अभवत्। मुख्यातिथिः आचार्यब्रजबिहारीचौबे-महोदयः (राष्ट्रपतिसम्मानितो विद्वान्) अत्र स्वाभिप्रायं प्राकटयत्। समनन्तरमेव आचार्यरामनारायणदासस्य संस्कृतशब्दसम्पदाविषयकं विशिष्टं व्याख्यानमभूत्। अस्य सत्रस्य सञ्चालनम् आचार्यमदनमोहनपाठकः अकरोत्। इत्येवं गरलीपरिसरे संस्कृतसप्ताहसमारोहः उत्साहेन प्रफुल्लतया च सम्पन्नः।

## भोपालपरिसरे



समापनसत्रस्य एकं दृश्यम्

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे ऐषमः संस्कृतदिवससमारोहः अगस्तमासे २६-२७-२८ तमेषु दिनेषु सुसम्पन्नः। दिनत्रयव्यापिनि अस्मिन् महामहसि बहवः कार्यक्रमा आयोजिताः। अस्योद्घाटनसत्रे भोपालस्थ-रामकृष्णाश्रमस्य विवेकानन्दविद्यापीठस्य च सञ्चालकः स्वामिभावरूपानन्दमहोदयः अध्यक्षरूपेण, भोपालस्थ-महर्षि-अगस्त्यवैदिकप्रतिष्ठानस्य अध्यक्षः डा. प्रभुदयालमिश्रवर्यश्च मुख्यातिथिरूपेण समागत्य छात्रान् उद्बोधितवन्तौ। उद्घाटनभाषणं कुर्वता मिश्रवर्येण उक्तं यत् 'भोपालपरिसरोऽयं मध्यप्रदेशस्य कृते महती उपलब्धिः वर्तते। प्रदेशेऽस्मिन् संस्कृतप्रचाराय संस्कृतिसंरक्षणाय च परिसरोऽयं महत्कार्यं करोति करिष्यति च।' कार्यक्रमारम्भे स्वागतभाषणं कुर्वद्भिः परिसरप्राचार्यैः प्रो. आजादमिश्रवर्यैः अस्य संस्कृतदिवससमारोहस्य महत्त्वम् उपवर्णितम्।

२७.०८.२०१० तमे दिनाङ्के परिसरच्छात्रेषु शास्त्रार्थ-प्रश्नमञ्च-गीतभाषणादिस्पर्धाः सुसम्पन्नाः। छात्राणां भाषणकौशलविकासार्थं वाग्वर्धिनीसभा अपि सुसम्पन्ना। तद्दिने अपराह्णे २.३० वादने काव्यसौन्दर्यदर्शनविषये विशिष्टव्याख्यानं सम्पन्नम्। जाबालिपुरस्थरानीदुर्गावती-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरः प्रो. रहसबिहारीद्विवेदिवर्यः गभीरं व्यापकं च व्याख्यानं व्यदधात्। विद्वच्चर्चानन्तरं सभाध्यक्षतां निर्वहन् परिसरप्राचार्यः प्रो. आजादमिश्रः प्रत्यपीपदत् 'ब्रह्मरसं शास्त्ररसं काव्यरसं चेति त्रितयम्।' परिसरप्राचार्यस्य प्रो. आजादमिश्रस्य आध्यक्ष्ये प्रवृत्ते समापनसत्रे स्पर्धासु प्राप्तस्थानाः सर्वे छात्राः पुरस्कृताः सञ्जाताः।

## गुरुवायूर्-परिसरे

३०.०८.१० तः ०३.०९.१० पर्यन्तं प्रचलितस्य संस्कृतसप्ताहस्य दिनत्रयव्यापिनः मुख्यकार्यक्रमस्य संस्कृतमहोत्सव-कार्यक्रमस्य समुद्घाटनं ३०.०८.१० दिनाङ्के केरलकलामण्डलस्य कुलसचिवेन डा. के. के. सुन्दरेशन्-महोदयेन कृतम्। आध्यक्ष्यं निर्वहता परिसरप्राचार्येण आचार्येण के. टि. माधवन्-महोदयेन संस्कृतोत्सवस्य उद्देश्यं विवृत्तम्। 'संस्कृतज्ञैः नूतनरचनया, अनुसन्धानेन परिचिन्तनेन च संस्कृतवाङ्मयस्य परिपुष्टिः विधेया' इत्यभिप्रायः डा. के. एच्. सुब्रह्मण्यन्-महोदयेन (भूतपूर्वकुलसचिवेन, कण्णूर्-विश्वविद्यालयस्य) स्वीयमुख्यभाषणे प्रकटितः। आचार्यलक्ष्मीनारायण-शर्ममहोदयः आगतेभ्यः सर्वेभ्यः स्वागतं व्याहरत्। डा. के. के. हर्षकुमार्-महोदयेन धन्यवादार्पणं कृतम्। डा. आर्. वेङ्कटरमणभट्टः सभासञ्चालकः आसीत्।


डा. के.के. सुन्दरेशनवर्यं सम्मानयन्
प्रा. के.टी. माधवन् अन्ये च

उद्घाटनसमनन्तरं अपराह्णे छात्राणाम् आशुभाषणस्पर्धा प्रवृत्ता। द्वितीयदिने ३१.०८.१० दिनाङ्के पद्योच्चारणस्पर्धा भगवद्गीताकण्ठपाठस्पर्धा च प्रवृत्ते। अत्र बहवः छात्राः भागमगृह्णन्। तृतीयदिने ०१.०९.१० दिनाङ्के रसप्रश्नः आयोजितः। ०२.०९.१० दिनाङ्के प्रश्नोत्तरीस्पर्धा सम्पन्ना।

कार्यक्रमस्याय समापनसत्रं ०३.०९.२०१० तमे दिनाङ्के प्रातः एकादशवादने समायोजितम्। कार्यक्रमोऽयं महामहोपाध्याय-आर्-वासुदेवन्-पोट्टि-महोदयस्य करकमलाभ्यां समुद्घाटितः। केरलशासनस्य संस्कृतस्य विशिष्टाधिकारिणी डा. सि. डि. सुनीतादेवीमहोदयायाः मुख्यातिथित्वे परिसरप्राचार्यस्य आध्यक्ष्ये च सम्पन्नेऽस्मिन् कार्यक्रमे स्पर्धासु विजयिभ्यः परिसरच्छात्रेभ्यः पुरस्कारवितरणं समभवत्। संस्कृतोत्सवमभियुज्य विविधक्षेत्रेषु विद्यमानविद्यालयेषु संस्कृतशिक्षणस्य प्रोत्साहनार्थं भाषणस्पर्धा, पद्योच्चरणस्पर्धा च आयोजिते आस्ताम्। डा. सिसिली-महोदयया सञ्चालितेऽस्मिन् कार्यक्रमे आचार्यः पि. जि. श्रीनिवासन्-महोदयः स्वागतभाषणं श्रीविश्वगोपाल् च कृतज्ञताभाषणम् अकरोत्।

## जम्मूस्थ-श्रीरणवीरपरिसरे

राष्ट्रियसंस्कृतसंस्थानस्य जम्मूपरिसरे संस्कृतसप्ताहान्तर्गतत्वेन २५ तः २७ अगस्त, १० मिते काले त्रिदिवसीयः संस्कृतसमारोहः सोल्लासं समाचरितः। समारोहस्यास्य प्रथमे दिने २५.०८.१० दिनाङ्के पूर्वाह्णे ११.०० वादने परिसरप्राचार्यस्य प्रो. विश्वमूर्तिशास्त्रिवर्यस्य आध्यक्ष्ये पुलिसमहानिदेशकचरस्य श्रीमदनमोहनखजूरियामहोदयस्य मुख्यातिथित्वे उद्घाटनसत्रं प्रवृत्तम्। उद्घाटनसत्रात्परं संस्कृतसम्भाषणं, श्लोकपाठः, श्लोकान्त्याक्षरी सूत्रान्त्याक्षरी इत्यादयः स्पर्धाः प्राचलन्। एतासु स्पर्धासु विद्यार्थिनः उत्साहपूर्वकं भागम् अगृह्णन्।

२६.०८.१० दिनाङ्के प्राचार्यस्य आध्यक्ष्ये जम्मूविश्वविद्यालयस्य पूर्वसंस्कृतविभागाध्यक्षायाः प्रो. वेदकुमारीघई-वर्यायाः मुख्यातिथित्वे च वैदिक-पौराणिकमङ्गलाचरणैः दीपप्रज्वलनपुरस्सरं कविता-सत्रस्य समारम्भो जातः। सत्रेऽस्मिन् प्रामुख्येन संस्कृतकविगोष्ठी आयोजिता आसीत्। प्राचार्यः श्लोकबद्धपदैः कवीनां स्वागतं व्याहरत्। प्रो. प्रियतमचन्द्रशास्त्रि-प्रो. रामप्रतापवेदालङ्कार-प्रो. वेदकुमारीघई-प्रो. विश्वमूर्तिशास्त्रि-प्रो. वैद्यनाथझा-डा. रामबहादुरशुक्ल-डा. विनोदकुमारगुप्त-श्री उपेन्द्रभार्गव-श्रीकृष्णकान्ततिवारी-श्रीजगदीशचन्द्रपाण्डेय-डा. सतीशकपूराः स्व-स्वसंस्कृतकाव्यैः श्रोतृगणं प्रमोदितवन्तः।

२७.०८.१० दिनाङ्के संस्कृतसमारोहस्य तृतीये दिने जम्मू-कश्मीरस्य माननीयः राजस्व-पुनर्वास-मन्त्री श्रीरमणभल्ला मुख्यातिथिरूपेण परिसरप्राचार्यः प्रो. विश्वमूर्तिशास्त्री च अध्यक्षरूपेण समापनसमारोहे मञ्चासीनौ आस्ताम्। संस्कृतसेवार्थं संस्कृतप्रचारयोगदानार्थं च

विद्वत्सम्मानेन डा. पीताम्बरदत्तशास्त्री डा. पवनकुमारशास्त्री च श्रीरणवीरपरिसरपक्षतः श्रीफलेन राङ्कवेन च सम्मानितौ अभवताम्। स्पर्धासु प्रथम-द्वितीय-क्रमेण स्थानं प्राप्तवतः छात्रान् मुख्यातिथिः पुरस्कारेण सभाजितवान्। परिसरपक्षतः मुख्यातिथिः श्रीरमणभल्ला विशिष्टस्मृतिचिह्नेन सम्मानितः। मन्त्रिवर्यः संस्कृतस्य लोकप्रियतां प्राचार्यवर्यस्य निर्देशने श्रीरणवीरपरिसरस्य उन्नतिं च उक्त्वा हार्दिकीं प्रसन्नतां प्रकटितवान्। अपेक्षितसहकारं कर्तुं सः आत्मनः तत्परतां चोक्तवान्। मुख्यातिथिसमुद्बोधनानन्तरम् अध्यक्षीयं भाषणं प्रचलितम्।

## जयपुरपरिसरे



उद्घाटनसत्रे (वामतः) प्रियतमशास्त्री, प्रो. कमलाकान्तमिश्रः, डा. कमलाबेनीवालः, प्रो. रा.देवनाथः, प्रा. अर्कनाथचौधरी सुदेशशर्मा च

जयपुरपरिसरे २०.०८.१० तः २५.०८.१० (श्रावणशुक्ल-एकादशीतो भाद्रकृष्णप्रतिपदं यावत्) संस्कृतसप्ताहमहोत्सवः समाचरितः। २०.०८.१० दिनाङ्के पूर्वाह्ने ११.०० वादने गुजरातप्रदेशस्य राज्यपालपदमलङ्कुर्वती संस्कृताभिमानिनी महामहिमशालिनी डा. कमला बेनीवालमहोदया दीपप्रज्वलनपुरस्सरं संस्कृतसप्ताहमहोत्सवस्यास्य उद्घाटनम् अकरोत्। उद्घाटनकार्यक्रमेऽस्मिन् अध्यक्षत्वेन संस्थानस्य कुलसचिवः आचार्यरामानुजदेवनाथवर्यः, सारस्वतातिथित्वेन संस्थानस्य निदेशकचरः आचार्यकमलाकान्तमिश्रमहोदयः जम्मूपरिसरस्य प्राचार्यचरः आचार्यप्रियतम-चन्द्रशास्त्री च आसन्। डा. कमला बेनीवालमहोदया संस्कृतच्छात्राणाम् उत्साहवर्धनं कुर्वती संस्कृतसंस्कारयोः सम्बन्धं प्रतिपादयत्। संस्थानस्य कुलसचिवेन विविधवैदिकप्रसङ्गैः संस्कृतस्य वैज्ञानिकता सुस्पष्टीकृता। तेन स्पष्टीकृतं यत् 'प्राचीन-नवीनयुगाभिसन्धौ दार्शनिक-राजनैतिक-सामाजिक-आर्थिकजीवनस्य आधारभूता वर्तते इयं संस्कृतभाषा।' सत्रेऽस्मिन् मञ्च-सञ्चालनम् आचार्यः सुदेशकुमारशर्मा, अभिनन्दनभाषणं डा. रामकुमारशर्मा सत्रान्ते कार्तज्ञ्यज्ञापनं वासुदेवशर्मा च अकुर्वन्। इत्येवमिदम् उद्घाटनसत्रं सम्पूर्तिं गतम्।

२३.०८.१० दिनाङ्के विशिष्टव्याख्यानसत्रावसरे मुख्यातिथिरूपेण राष्ट्रपतिसम्मानितो विद्वान् आचार्यराजेन्द्रनानावटीवर्य उपस्थितोऽऽसीत्। आचार्यः अर्कनाथचौधरी सत्रस्यास्य आध्यक्ष्यं निरवहत्। सारस्वतातिथित्वेन परिसरस्यैव विद्वांसौ आचार्य-के. पी. केशवन्-आचार्यशिवकान्तझावर्यौ आस्ताम्। सत्रेऽस्मिन् मुख्यवक्तारः डा. उमाकान्तचतुर्वेदि-डा. श्रीधरमिश्र-डा. ईश्वरभट्ट-डा. रमाकान्तपाण्डेया आसन्। छात्रैरपि काव्यपाठ-सूत्रपाठ-संस्कृतगीतानि प्रस्तुतानि।


सम्पूर्तिसमारोहसत्रस्य एकं दृश्यम्

२५.०८.१० दिनाङ्के संस्कृतसप्ताहमहोत्सवस्य सम्पूर्तिसमारोहे मुख्यातिथित्वेन राजस्थानसर्वकारस्य संस्कृतशिक्षा-मन्त्री श्रीवृजकिशोरशर्मा, अध्यक्षत्वेन संस्थानकुलपतिः आचार्यराधावल्लभत्रिपाठी, सारस्वतातिथित्वेन सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिचरः आचार्यराजेन्द्रमिश्रः राष्ट्रपतिसम्मानितो विद्वान् देवर्षिकलानाथशास्त्री च आसन्। परिसरप्राचार्यः प्रो. अर्कनाथचौधरी स्वागतवचोभिः अतिथीनां स्वागतम् अकरोत्।

श्रीमता मन्त्रिमहोदयेनोक्तं यद् 'राजस्थाने संस्कृतप्रचारप्रसारः वृद्धिं भजते। परम् अद्यत्वे तत्र पूर्णता तदैवागच्छेत् यदा वयं कृतनिश्चयाः सन्तः सेवां विधास्यामः।' देवर्षिकलानाथशास्त्रिणोक्तं यद् 'वयं वर्तमानकालीने विषमसमाजे संस्कृतौ निहितनीतिरीतीनामनुसरणं कृत्वा जीवनं सफलीकर्तुं शक्नुमः।' नूतनकाव्यकौशलविचक्षणः श्रीमदभिराजराजेन्द्रबुधः छात्रेभ्यः संस्कृते काव्यकरणाय नवीनानां विचाराणां प्रयोगाय प्रेरणां प्रदत्तवान्, स्वीयेन सुमधुरकवितापाठेन श्रोतॄन् च आकृष्टवान्। अध्यक्षः आचार्यप्रवरः त्रिपाठिवर्यः जयपुर-परिसरे 'भट्टमथुरानाथशास्त्रिस्मृतिकेन्द्रं' प्रतिष्ठापयितुम् उद्घोषितवान्। अन्ते च धर्मशास्त्रविभागाध्यक्षः प्रो. भगवतीसुदेशमहोदया अभ्यागतानां अतिथीनां कार्तज्ञ्यं व्याहृतवती। राष्ट्रगानेन कार्यक्रमोऽयं सम्पूर्तिमागात्।

## शृङ्गेरीपरिसरे


उद्घाटनावसरे भाषणं कुर्वन् शृङ्गेरीशारदा-पीठाधीश्वरः श्रीभारतीतीर्थमहास्वामिपादः

राष्ट्रियसंस्कृतसंस्थानस्य शृङ्गेरीस्थ-राजीवगान्धीपरिसरे २२.०८.१० तः २४.०८.१० पर्यन्तं संस्कृतोत्सवः समाचरितः। २२.०८.२०१० दिनाङ्के पूर्वाह्ने ८.३० वादने शृङ्गेरीशारदापीठाधीश्वरः श्रीभारतीतीर्थमहास्वामिपादः अस्य उत्सवस्य उद्घाटनं कृतवान्। उद्घाटनकार्यक्रमोऽयं नृसिंहवनस्थ-गुरुभवने प्रचलितः, यत्र 'वाक्यार्थभारती' इति ग्रन्थस्य आविष्कृतिरपि जाता। स्वामिपादः गैर्वाण्या रक्षणस्य आवश्यकतां प्रतिपादितवान्। सर्वेऽपि भारतीयाः संस्कृतज्ञाः भवेयुरिति स्वामिनः

वक्तव्यस्य आशयः आसीत्। अपराह्णे च २.३० वादने परिसरभवने 'सुदुघा'इत्यत्र वाराणसीहिन्दूविश्वविद्यालयस्य ज्योतिषविभागाध्यक्षः आचार्यः सच्चिदानन्दमिश्रवर्यः ज्योतिष-शास्त्रे शारदाविशिष्टव्याख्यानमालायाः उद्घाटनमकरोत्। अस्मिन् कार्यक्रमे परिसरप्राचार्यः ए. पी. सच्चिदानन्दवर्यः आध्यक्ष्यं निरवहत्।

२३.०८.१० दिनाङ्के परिसरच्छात्राणां भाषणस्पर्धा, गानस्पर्धा समस्यामेदिनी च सम्पन्नाः। अपराह्णे संस्कृतनाटकस्य कर्णभारस्य मञ्चीयप्रस्तुतिरपि अभवत्। २४.०८.१० दिनाङ्के संस्कृतस्पर्धाः, सांस्कृतिककार्यक्रमाश्च प्रवर्तिताः अभवन्। छात्रैः संस्कृतभाषणस्पर्धायां गीताकण्ठपाठस्पर्धायां च सोत्साहं भागः ग्रहितः। अपराह्णे ३.३० वादने सञ्चलिते समारोपसमारोहे कर्णाटकराज्यविधानपरिषत्सदस्या बेङ्गलूरुस्थ-अभिनयभारतीसंस्थायाः व्यवस्थापकनिदेशिका च एस्.आर्. लीलावर्या जेतृभ्यः छात्रेभ्यः पुरस्कारान् व्यतरत्। संस्कृताध्यापकान् प्रशंसन्ती सा 'संस्कृतच्छात्रैरपि विज्ञानदृष्ट्या संस्कृताध्ययनं कर्तव्य'मिति भृशं प्रतिपादितवती। अन्ते पुरस्कारवितरणकार्यक्रमेण संस्कृतोत्सवोऽयं समाप्तिमागात्।

### मुम्बईपरिसरे

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थ-के.जे. सोमैया-संस्कृत-विद्यापीठे विद्याविहारे २३.०८.१० तः २८.०८.१० पर्यन्तं संस्कृतोत्सवः अत्यन्तम् उत्साहेन समाचरितः। २३.०८.१० दिनाङ्के पूर्वाह्णे ११.०० वादने उद्घाटनसमारोहः विद्यापीठस्य कलाभवने आयोजितः अभवत्। उद्घाटनसमारोहेऽस्मिन् मुख्यातिथित्वेन डा. रामरूपमिश्रमहोदयः सारस्वतातिथित्वेन च डा. ललिता नाम जोशीवर्यः उपस्थितौ आस्ताम्। परिसरप्राचार्यः एम्.ए. बाबुः अत्र आध्यक्ष्यं निर्व्यूढवान्। सम्पूर्णे सप्ताहे विविधस्पर्धाः कार्यक्रमाश्च समायोजिताः अभवन्।

२८.०८.१० दिनाङ्के सायं ४.०० वादने मुम्बईविद्यापीठस्य रामकृष्णबजाज्-संस्कृतभवने संस्कृतसप्ताहमहोत्सवस्य अपरनामधेयस्य संस्कृतोत्सवस्य समापनसमारोहः आयोजितः अभूत्। मुख्यातिथिरूपेण मुम्बईस्थितस्याः अब्जर्वल्-रिसर्च-फाउण्डेसन्स्-संस्थायाः अध्यक्षः श्रीसुधीन्द्रकुलकर्णीवर्यः समाहूतः आसीत्। लोकसत्तादैनिकवार्तापत्रस्य सम्पादकः श्रीविनायकपरब्महोदयः विशिष्टातिथित्वेन उपस्थितोऽऽसीत्। कार्यक्रमेऽस्मिन् प्राचार्यः एम्.ए. बाबु अध्यक्षीये भाषणे संस्कृतोत्सवस्यास्य महत्त्वम् अतिथीनां च प्रति कार्तज्ञ्यं ज्ञापितवान्।

### पुरीपरिसरे




श्रीवाचस्पतिकरशर्माणं सम्मानयन्
प्रा.जी. गङ्गन्ना अन्ये च

परिसरे ऐषमः संस्कृतसप्ताहसमारोहः महता उत्साहेन समाचरितः। तत्रादौ २३.०८.२०१० तमे दिनाङ्के सोमवासरे उद्घाटनकार्यक्रमे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. नीलकण्ठपतिः मुख्यातिथिः आसीत्। सप्ताहाङ्गभूततया नैके सांस्कृतिककार्यक्रमाः स्पर्धाः च आयोजिताः अभवन्।

२५.०८.२०१० तमे दिनाङ्के आयोजिते समापनोत्सवकार्यक्रमे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य सर्वदर्शनविभागाध्यक्षः प्रो. प्यारीमोहनपट्टनायकः मुख्यातिथिभाषणमकरोत्। अवसरेऽस्मिन बरगड-मण्डलान्तर्गतः सुप्रसिद्धकविः संस्कृतपण्डितः श्रीमान् वाचस्पतिकरशर्मा सम्मानितः।

## गुरुवायूरुपरिसरे हिन्दीपक्षसमारोहः समाचरितः



हिन्दीपक्षसमारोहस्य उद्घाटनकार्यक्रमस्य
किञ्चन दृश्यम्

प्रतिवर्षानुसारम् अस्मिन्नपि वर्षे १४.०९.१० तः २८.०९.१० पर्यन्तं गुरुवायूर्-परिसरे हिन्दीपक्षसमारोहः अतीव उत्साहेन आचरितोऽभूत्। अस्य समारोहस्य उद्घाटनकार्यक्रमे मुख्यातिथित्वेन राष्ट्रियसंस्कृतसंस्थानस्य परियोजना-अधिकारी डा. शुक्ला मुखर्जी, मुख्यवक्तृरूपेण ब्रण्णनकलाशालायाः सेवानिवृत्तप्रवक्ता डा. के.वि. मुरलीधरन्-पिल्लैः अध्यक्षत्वेन परिसरप्राचार्यः के. टि. माधवन् च उपस्थिताः आसन्। डा. अशोककुमारकछवाहः अस्य उद्घाटनकार्यक्रमस्य सञ्चालनम् अकरोत्।

परिसरविद्यार्थिनां कृते १५.०९.१० तः २२.०९.१० पर्यन्तं हिन्दीभाषणस्पर्धा, काव्यपाठस्पर्धा, निबन्धलेखनस्पर्धा, हिन्दी-वादविवाद-स्पर्धा काव्यरचनास्पर्धा च आयोजिताः अभवन्। कर्मचारिणां कृते २३.०९.१० तः २७.०९.१० पर्यन्तं हिन्दीभाषणस्पर्धा, निबन्धलेखनस्पर्धा श्रुतलेखनस्पर्धा च आयोजिताः अभवन्। २८.०९.१० दिनाङ्के अस्य हिन्दीपक्षसमारोहस्य सम्पूर्तिकार्यक्रमः पुरस्कारवितरणकार्यक्रमश्च सम्पन्नः।

# गरलीपरिसरवार्ता

## नवपरिसरे वृक्षारोपणम्

१९.०८.२०१० तमे दिनाङ्के गरलीपरिसरस्य छात्रैः, अध्यापकैः कर्मचारिभिश्च प्राचार्यस्य डा. प्रकाशपाण्डेयमहोदयस्य पुरोगतया बलाहरग्रामस्योपकण्ठे विद्यमानस्य विपाशातीरगतस्य नवपरिसरस्य निर्मीयमाणभवनस्य वीथिषु द्विशतं वृक्षाः आरोपिताः।



गरलीपरिसरस्य नूतनभवने वृक्षारोपणस्य दृश्यम्

## जैव-विविधतासङ्गोष्ठी

३०.०८.२०१० दिनाङ्के गरली-परिसरे जैव-विविधताविषयिणी सङ्गोष्ठी समायोजिता। जैव-विविधतया जायमानं प्राकृतिकं सन्तुलनं लोकस्य श्रेयसे भवतीति बोधं विशिष्य छात्रेषु सङ्क्रमयितुं गोष्ठीयमायोज्यत। अत्र डा. अजीतकुमार-अग्निहोत्रिमहोदयः स्नातकोत्तर-महाविद्यालयात् हमीरपुरस्थादागत्य प्रकृतविषयसम्बद्धं विशिष्टं प्रबोधनमकार्षीत्। जैववैविध्यसंरक्षणार्थञ्च तत्रभवान् प्राचीनकृषिपद्धतिं विशेषेण प्राशंसत् यत्रोर्वरकरूपेण प्राकृतिकपदार्थानामुपयोगः क्रियते स्म। अपरो वक्ता डा. रविकुमारमहोदयः (हिमाचल-कृषिविभागस्य अधिकारी) वृक्ष-वनस्पतिसंरक्षणस्य महत्त्वातिशयं प्रतिपादयन् रासायनिकानाम् उर्वरकाणाम् अतिशयप्रयोगेण जायमानां भूमेर्वन्ध्यतां मनुष्याणां व्याधिबहुलताञ्च विशेषेण अवर्णयत्।

## हिन्दीपक्षसमारोहः

२०.०९.२०१० दिनाङ्के गरली-परिसरे हिन्दीपक्ष-समारोहः सोत्साहं मानितः। तत्र 'राष्ट्रभाषा हिन्दी का महत्त्व व इसके प्रति हमारा कर्त्तव्य' इति विषयमधिकृत्य परिसरच्छात्राणां भाषणस्पर्धा कवितापाठस्पर्धा च समायोजिताभूत्। परिसरप्राचार्यस्य के. वी. सुब्बारायडूमहोदयस्य अध्यक्षत्वे प्रवृत्तेऽस्मिन् समारोहे ढलियारा-राजकीयमहाविद्यालयात् मुख्यातिथिरूपेण आगतः तत्रत्यः प्राचार्यः डा. रक्षपालजिन्दलमहोदयः स्वविचारान् प्राकटयत्।

समारोहस्यास्य विशिष्टातिथिः नलेटीग्रामस्थस्य केन्द्रीयविद्यालयस्य प्राचार्यः डा. गङ्गाशरणमहोदयः आसीत्। समारोहाध्यक्षः परिसर-प्राचार्यः आचार्य-सुब्बारायुडुमहोदयः अहिन्दीभाषी सन्नपि राष्ट्रभाषायाः गौरवं पुरस्कृत्य तां प्रति निबद्धश्रद्धः कार्यालयगतं सर्वं कार्यं हिन्द्या संस्कृतेन वा कर्त्तुं दृढं सङ्कल्पमुदघोषयत्।

## सरस्वती-परिषदायोजनम्

३०.०९.२०१० तमे दिनाङ्के परिसरच्छात्राणां सरस्वती-परिषद् आयोजिता, यत्र छात्रा शास्त्रीयविषयमुपादाय व्याख्यानं कृतवन्तः। व्याख्यानान्तरं च प्रस्तुतविषये श्रोतृवक्तृकृतप्रश्नोत्तरमुखेन समीक्षा कृताभूत्। साहित्यविभागाध्यक्षः डा. विजयपालशास्त्री अत्र छात्राणां प्रमादस्थलेषु विशिष्टं प्रतिबोधनमकार्षीत्।

# जम्मूपरिसरस्य विविधगतिविधयः

**प्राथमिकचिकित्साशिबिरम्-** २७.०८.१० तः १५.०९.१० पर्यन्तं शिक्षाशास्त्रविभागे प्राथमिक-चिकित्सा-शिबिरम् आयोजितमभवत्। शिबिरेऽस्मिन् छात्राः प्राथमिकचिकित्सा-उपायान् ज्ञातवन्तः।

**शिक्षकदिवसोत्सवः-**०६.०९.१० दिनाङ्के जम्मूपरिसरस्य स्नातकोत्तर-शिक्षाशास्त्र-विभागे शिक्षकदिवसोत्सवः आचरितः। अस्मिन् कार्यक्रमे जम्मू-कश्मीरराज्यस्य राज्यायुक्तः आई.डी. सोनीवर्यः मुख्यातिथिरूपेण समागत्य स्वीये भाषणे शिक्षकदिवसस्य महत्त्वं, शिक्षकान् प्रति छात्राणां कर्त्तव्यानि चोक्तवान्। कार्यक्रमस्य अध्यक्षः परिसरप्राचार्यः आचार्यः विश्वमूर्तिशास्त्री शिक्षकानां छात्राणां च मिथः कर्त्तव्यम् उद्बोधयत्। शिक्षाशास्त्रच्छात्राः छात्र्यश्च अतिथिं आई.डी. सोनीं सम्मानितवन्तः। कार्यक्रमान्ते डा. गोविन्दपाण्डेयः धन्यवादं ज्ञापयत्।

**हिन्दीपक्षकार्यक्रमः-**०७.०९.१० तः २३.०९.१० पर्यन्तं हिन्दीपक्षकार्यक्रमः समाचरितः। सम्पूर्णे पक्षे हिन्दीभाषायाः विकासाय प्रचाराय च भिन्न-भिन्नकार्यक्रमाः आयोजिताः अभवन्। हिन्दीपक्षस्य समापनसमारोहे २३.०९.१० दिनाङ्के जम्मू-कश्मीरराज्यस्य पूर्वमुख्यसचिवः डा. सुधीरसिंहबलौरियामहोदयः मुख्यातिथिः परिसरप्राचार्यः आचार्यविश्वमूर्तिशास्त्री च अध्यक्षः आस्ताम्। समारोहेऽस्मिन् सुप्रसिद्धकवये जम्मूविश्वविद्यालयस्य हिन्दीविभागस्य अध्यक्षचराय डा. विद्यानाथगुप्ताय हिन्दीप्रतिभासम्मानः दत्तः। परिसरकार्यालयस्य श्रीरमेशचन्द्रः राजभाषया हिन्द्या समधिकतमं कार्यं कर्तुं हिन्दीमित्रसम्मानम् आप्तवान्। हिन्दीपक्षकार्यक्रमे विजयश्रियं प्राप्तवन्तः विद्यार्थिनः पुरस्कृताः अभवन्।

## इलाहाबादपरिसरे

### पद्मश्रीपण्डितमण्डनमिश्रस्मृतिव्याख्यानमाला द्वितीयपुष्पत्वेन विकसिता

इलाहाबादस्थे गङ्गानाथझापरिसरे राष्ट्रियसंस्कृतसंस्थानेन प्रवर्तिता पद्मश्रीपण्डितमण्डनमिश्रस्मृतिव्याख्यानमाला समनुष्ठिताऽभवत्। १६.०७.१० दिनाङ्के गङ्गानाथझापरिसरस्य सभाप्रकोष्ठे अपराह्ने ३.०० वादने इयं स्मृतिव्याख्यानमाला आयोजिता आसीत्। वाराणसीहिन्दू-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यसोमनाथनेने "मीमांसादर्शनस्य वैशिष्ट्यम्" इति विषयमाधृत्य व्याख्यानमकरोत्। परिसरप्राचार्यः आचार्यः सुरेन्द्रझाः कार्यक्रमस्य सफलायोजनार्थं सर्वान् प्रति धन्यवादं ज्ञापयत्।

## भोपालपरिसरे आयोजिताः विविधकार्यक्रमाः



स्वतन्त्रतादिवसम् आचरन्तः प्राचार्यः अन्ये च

### स्वतन्त्रतादिवससमारोहः

अगस्तमासस्य १५ दिनाङ्के परिसरे स्वतन्त्रतादिवसस्य पावनावसरे परिसरप्राचार्यैः आचार्य-आजाद-मिश्रमहोदयैः राष्ट्रिय-एकतायै राष्ट्रचेतनायै च उद्बोधितम्। स्वतन्त्रतादिवसोपलक्ष्ये विभिन्नाः भाषणगीतादिकार्यक्रमाः परिसरच्छात्रैः प्रस्तुताः। अवसरेऽस्मिन् 'इण्डिपेण्डेन्स् कप्'-नाम्ना क्रिकेट्स्पर्धापि आयोजिताऽभवत्। स्पर्धायामस्यां शिक्षाशास्त्रिव्यासवर्गो विजयश्रियं वृतवान्।

### संस्कृतसम्भाषणशिबिरम्

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य शिक्षाशास्त्रिविभागे छात्राणां सम्भाषणकौशलविकासार्थं दशदिवसात्मकं संस्कृतसम्भाषणशिबिरमभूत्।

### डा. राधाकृष्णन्स्मृतिव्याख्यानमाला

०६.०९.२०१० दिनाङ्के शिक्षकदिवसोपलक्ष्ये राष्ट्रियसंस्कृतसंस्थानेन प्रवर्तिता डा. राधाकृष्णन्स्मृतिव्याख्यानमाला भोपालपरिसरे आयोजिता। संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी कार्यक्रमस्य अध्यक्षपदं व्यभूषयत्। मुख्यवक्तृरूपेण नवदेहलीस्थ-साहित्य-अकादम्याः पूर्वसचिवः प्रो. इन्द्रनाथचौधुरीमहोदयः 'कालिदासप्रणीतं मेघदूतं रवीन्द्रनाथठाकुरः च' इति विषयमधिकृत्य विशिष्टव्याख्यानं विहितवान्। प्रो. चौधुरीमहोदयस्य व्याख्यानं नितान्तं गभीरं महत्त्वपूर्णं चासीत्। तत्र तेन सोदाहरणं प्रतिपादितं यत् 'रवीन्द्रनाथठाकुरः आजीवनं मेघदूतं कालिदासविरचितं चिन्तितवानिव प्रतीयते, अत एव स काव्यजीवनस्य प्रारम्भे मध्ये पर्यन्ते च कालिदासीयं मेघमाश्रित्य कवितां रचितवान्। अतः आजीवनं मेघदूतेन प्रभावितः श्रीरवीन्द्रनाथः इति सम्यग् वक्तुं शक्यते।'

अध्यक्षीयभाषणे कुलपतिः प्रो. राधावल्लभत्रिपाठी मेघदूतस्य रोलाछन्दसि रचितं स्वकीयमनुवादं मेघसन्देशं तथागायत् येन सभालोकः कामं काव्यानन्दनिमग्नोऽदृश्यत। स्वागतभाषणं कुर्वता परिसरप्राचार्येण प्रो. आजादमिश्रवर्येण विषयप्रवर्तने संक्षिप्तं विश्लेषणं विहितम्।




डा. राधाकृष्णन्स्मृतिव्याख्यामाला-कार्यक्रमस्य किञ्चन दृश्यम्

### प्राथमिकोपचारप्रशिक्षणकार्यक्रमः

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य शिक्षाशास्त्रिविभागे ०६.०९.१० तः १०.०९.१० पर्यन्तं प्राथमिकोपचारप्रशिक्षणकार्यक्रमः प्रचलितः। प्रशिक्षणेऽस्मिन् रेडक्रासससमितिप्रहितेन चिकित्सकेन प्राथमिकोपचारविषयकं ज्ञानमुपदिष्टम्।

### इन्दौरनगरे प्रतिज्ञायौगन्धरायणस्य मञ्चनम्

कालिदास-अकादमीपक्षतः इन्दौरनगरस्य छत्रीबागस्थिते वेङ्कटेशमन्दिरे समायोजिते अखिलभारतीयनाट्यमहोत्सवे भोपालपरिसरपक्षतः भासस्य रूपकं प्रतिज्ञायौगन्धरायणं डा. सुज्ञानकुमारमाहान्तिमहोदयस्य निर्देशने छात्रैः अभिनीतम्। अवसरेऽस्मिन् संस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठिवर्यः, पतञ्जलिसंस्कृतसंस्थानस्य सभापतिः प्रो. मिथिलाप्रसादत्रिपाठिवर्यः कालिदास-अकादम्याः निदेशकः प्रो. परमेश्वरनारायणशास्त्रिवर्यः च छात्राणां नाट्यकलां भूयोभूयः प्राशंसुः।

परिसरवार्ता

## जयपुरपरिसरे आयोजितकार्यक्रमाः



व्याख्यानमालायां भाषणं कुर्वन् प्रो. प्रेमसुमनजैनः

### आचार्यहीरालालजैनस्मृतिव्याख्यानमाला समायोजिता

संस्कृत-प्राकृत-अपभ्रंशादिप्राच्यविद्यानां महाविदुषः आचार्यहीरालालजैनवर्यस्य प्राच्यविद्या-सेवास्मृतौ राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे ७ सितम्बर, २०१० दिनाङ्के एका व्याख्यानमाला आयोजिताऽभवत्। अवसरेऽस्मिन् मुख्यवक्तृरूपेण राष्ट्रपतिसम्मानितो विद्वान् प्रो. प्रेमसुमनजैनमहोदयः प्राकृतापभ्रंशकथासाहित्यस्य माहात्म्यम् अकथयत्। 'प्राकृतापभ्रंशकथासु भारतीयजीवनमूल्यस्य प्रतिष्ठा विद्यते। तत्तद्भाषाकथानां सदैव परस्परं विनिमयमपि जातं जायते च। कथाः साक्षात् प्रेरकाः भवन्ति। भाषादृष्ट्यापि कथानां वैशिष्ट्यं वर्तते यतोहि कथासु लोकजीवनवर्णनकारणात् तत्र शब्दसम्पदः उपलभ्यन्ते' इत्ययं व्याख्यानस्यास्य मुख्यांशो आसीत्। आध्यक्ष्यं निर्वहन् परिसरप्राचार्यः आचार्य-अर्कनाथचौधरीमहोदयोऽपि व्याकरणिकविश्लेषणेन सह कथानां महत्त्वं प्रतिपादितवान्। व्याख्यानमालावसरेऽस्मिन् मुख्यातिथिः प्रो. कमलचन्दसोगानीमहाभागः समुपस्थितः आसीत्। कार्यक्रमस्यास्य कुशलसञ्चालनं डा. धर्मेद्रकुमारजैनः अकरोत्।

### अन्ताराष्ट्रिय-युवदिवसः

जयपुरपरिसरे रेड-रिबन-क्लब-संस्थायाः साहाय्येन १२.०८.१० दिनाङ्के अन्ताराष्ट्रिय-युवदिवसः समाचरितः। अवसरेऽस्मिन् भित्तिपत्रस्पर्धा निबन्धलेखनस्पर्धा च आयोजिते। तत्र भित्तिपत्र-स्पर्धायाम् आहत्य ९ विद्यार्थिनः भागं ग्रहीतवन्तः। तेषु प्रथमस्थानं मधुसूदनशर्मा, द्वितीयस्थानं राहुलबोधा तृतीयस्थानं रूपकुमारशर्मा च अलभन्। निबन्धस्पर्धायाम् आहत्य २५ प्रतिभागिषु प्रथमादिक्रमेण हेमन्तसिंहयादवः, सन्तदिग्विजयरामः गरिमा-दाधीच च पुरस्कारभाजः अभवन्। कार्यक्रमोऽयं डा. कमलेशकुमारजैनेन सञ्चालितः।

### हिन्दीदिवस-जैववैविध्यवर्षकार्यक्रमौ आयोजितौ



कार्यक्रमे सभां सम्बोधयन् राजेन्द्रसिंहः

जयपुरपरिसरे हिन्दीदिवस-जैववैविध्यवर्षयोः १४ सितम्बर, २०१० दिनाङ्के आयोजिते संयुक्तव्याख्यानकार्यक्रमे मुख्यातिथित्वेन वाटरमैन् (वरुणदेवः) इति नाम्ना ख्यातः विजितमैग्सेसेपुरस्कारः श्रीराजेन्द्रसिंहः, मुख्यवक्तृत्वेन राजस्थानविश्वविद्यालयस्य आचार्यौ प्रो. पी.एस. वर्म-प्रो. राधेश्यामजाङ्गिडौ आस्ताम्। कार्यक्रमेऽस्मिन् पर्यावरणप्रदूषणेन जायमानां हानिं प्रति राजभाषां हिन्दीं च प्रति चिन्ता प्रकटिता। डा. अरुणा शर्मा अपि दृश्यमाध्यमेन व्याख्यानं प्रस्तुतवती। प्रो. सन्तोषमित्तल प्रो. सुदेशशर्मा च स्वाभिप्रायं प्रकटितवन्तौ। स्वीये अध्यक्षीयभाषणे परिसरप्राचार्यः आचार्य-अर्कनाथचौधरी कार्यक्रमसम्बद्धं विषयं प्रख्यापितवान्। डा. सुरेशसिंहराठौडः कार्यक्रमं सञ्चालितवान्।

### हिन्दीपक्ष-योगशिबिरयोः सम्पूर्तिसमारोहः

जयपुरपरिसरे ३०.०९.१० दिनाङ्के सायं ३.०० वादने हिन्दीपक्षस्य योगशिबिरस्य च संयुक्तरूपेण सम्पूर्तिसमारोहः आयोजितः अभवत्। अस्मिन् सम्पूर्तिसमारोहे मुख्यातिथित्वेन डा. गजाननमिश्रः (पूर्वनिदेशकः, राजस्थानशासनस्य राजभाषाविभागस्य), सारस्वतातिथित्वेन डा. सतीशकीलावतः (प्राचार्यचरः राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरस्य) मुख्यवक्तृत्वेन श्रीकुलभूषणबैराठी (सहप्रान्तप्रभारी, राजस्थानप्रदेशस्य पतञ्जलियोगसमित्याः) अध्यक्षत्वेन च आचार्यः अर्कनाथचौधरी (प्राचार्यः जयपुरपरिसरस्य) समुपस्थिता आसन्। हिन्दीभाषास्थितिविषये डा. गजाननमिश्रः सुष्ठु सम्बोधयत्। श्रीकुलभूषणबैराठी प्रायोगिकरूपेण योगस्य महत्त्वं प्रतिपादयत्।

## शृङ्गेरीपरिसरवार्ता

### वाग्वर्धिनीपरिषदः व्यायामशालायाः च उद्घाटनम्

२२.०७.१० दिनाङ्के वाग्वर्धिनीपरिषदः उद्घाटनं पुण्यपत्तनस्थ-भण्डारकर्-प्राच्यशोध-संस्थायाः निदेशिकया आचार्यसरोजाभाटेमहाभागया अनुष्ठितम्। तया वाग्वर्धिन्याः अन्तर्जालीयपुटकस्यापि आरम्भः कारितः। अवसरेऽस्मिन् भाषमाणा आचार्या संस्कृतक्षेत्रे विविधैः पाश्चात्यैः क्रियमाणानां योगदानानाम् उल्लेखनपूर्वकम् अध्यापकैः छात्रैश्च विविधानाम् अमुद्रितानां पाण्डुलिपिग्रन्थानां प्रकाशने यत्नः कार्यः इति प्रैरयत्। अवसरेऽस्मिन् अध्यक्षभाषणे परिसरप्राचार्येण वाग्वर्धिनी-अन्तर्जालीयपुटकस्य मुख्यता, संस्कृतक्षेत्रे च महाराष्ट्रीयानां योगदानं प्रादर्शि। वाग्वर्धिनीपरिषदः अध्वदर्शकेन डा. सूर्यनारायणभट्टेन स्वागतभाषणम् अभ्यागतानां परिचयश्च कारितः। अपरेण अध्वदर्शकेन डा. के. हरिप्रसादवर्येण वाग्वर्धिनीपरिषदः मुख्योद्देश्यं योजनाश्च प्रदर्शिताः।




वाक्यार्थपरिषदि उद्बोधयन् श्रीपादसुब्रह्मण्यः

२२.०७.१० दिनाङ्के परिसरस्य 'वज्रिणी'व्यायामशालायाः अपि उद्घाटनम् आचार्यया श्रीमत्या सरोजाभाटेमहाभागया सम्पादितम्। तत्र परिसरप्राचार्यस्य आध्यक्ष्ये शारीरिकप्रशिक्षकः श्री एच्.डि. रामचन्द्रमहोदयः कार्यक्रमममुं समचालयत्।

### वाक्यार्थपरिषदः उद्घाटनम्

२७.०७.१० दिनाङ्के हैदराबादनगरस्थ-आन्ध्रसर्वकारीय-प्राच्य-पाण्डुलिपिग्रन्थालयस्य गवेषणकेन्द्रस्य च निदेशकः आचार्यः श्रीपादसुब्रह्मण्यमहोदयः वाक्यार्थपरिषदः उद्घाटनं निरवहत्। अवसरेऽस्मिन् परिसरे क्रियमाणायाः वाक्यार्थशैल्याः संरक्षणं प्रशंसन् सः छात्रैः शास्त्रे अगाधं ज्ञानं सम्पादनीयम् इत्यवोचत्। तेन 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति विषये वाक्यार्थः कृतः। परिसरस्य वेदान्तविभागाध्यक्षेन डा. महाबलेश्वरभट्टेन 'समन्वयाधिकरणम्' इति विषये, नव्यन्यायविभागाध्यक्षेन डा. नवीनहोल्लमहोदयेन 'परामर्शलक्षणम्' इति विषये च वाक्यार्थः अकारि। परिसरप्राचार्यः डा. ए.पि. सच्चिदानन्दमहोदयः आध्यक्ष्यं निरवहत्। अस्य शैक्षिकवर्षस्य वाक्यार्थपरिषत्समायोजकाभ्यां डा. रामचन्द्रजोयिस्-श्रीवेङ्कटेशताताचार्याभ्याम् उद्घाटनसत्रं सुष्ठु संयोजितम्।

१७.०८.२०१० दिनाङ्के वाक्यार्थपरिषदः द्वितीयम् अधिवेशनं समभूत्। तत्र साहित्यविभागाध्यक्षेण डा. कृष्णन् नम्बूदिरिमहोदयेन 'औचित्यविचारः' इति विषये, शिक्षाशास्त्रिप्राध्यापकेन डा. रामचन्द्रुलबालाजी-महोदयेन 'मानसिकस्वास्थ्यम्' इति विषये, वेदान्तप्राध्यापकेन डा. गणेश-ईश्वरभट्टमहोदयेन 'आत्मनः स्वयम्प्रकाशत्वम्' इति विषये, व्याकरणविभागाध्यापकेन डा. मधुकेश्वरभट्टमहोदयेन 'हलोऽनन्तराः संयोगः' इति विषये, ज्योतिषविभागाध्यापकेन रामकृष्णपेजत्तायमहोदयेन 'भूस्वरूपम्' इति विषये च वाक्यार्थाः प्रस्तुताः। आचार्यः डा. महाबलेश्वर पि. भट्टवर्यः पर्यवेक्षणभाषणम् अकरोत्।

२१.०९.२०१० दिनाङ्के ऐषमः वाक्यार्थपरिषदः तृतीयमधिवेशनमभूत्। यत्र च डा. चन्द्रकान्तमहोदयः 'ब्लूम-महोदयस्य शैक्षिकोद्देश्यम्', डा. सूर्यनारायणभट्टः 'तन्त्रनिरूपणम्', डा. सोमनाथसाहुः 'असाधारणबालकानां शिक्षा', डा. चन्द्रकलाकोण्डि 'अनलङ्कृती पुनः क्वापि', डा. ओ. आर्. विजयराघवन् 'प्रत्यक्षलक्षणम्' इति विषयानधिकृत्य वाक्यार्थम् अकुर्वन्। व्याकरणविभागाध्यक्षेण डा. सि.एस्.एस्. नरसिंहमूर्तिमहोदयेन पर्यवेक्षकभाषणमकारि। संयोजकाभ्यां डा. रामचन्द्रजोयिस्-डा. वेङ्कटेशताताचार्याभ्यां कार्यक्रमः सुचालितः।




हिन्दीदिवसे भाषणं कुर्वन् डा. राधेश्यामशुक्लः

### हिन्दी-दिवस-समारोहः

ऐषमः हिन्दीदिवससमारोहः शृङ्गेरीस्थे राजीवगान्धीपरिसरे १३.०९.१० दिनाङ्के समनुष्ठितोऽभवत्। पूर्वाह्णे १०.०० वादनतः १.०० वादनं यावत् अभिव्यक्तिस्पर्धा, भाषणस्पर्धा, गीतस्पर्धा नृत्यस्पर्धा च आयोजिताः अभवन्। अपराह्णे २.०० वादनतः ५.०० वादनं यावत् पुरस्कारवितरणकार्यक्रमः प्रचलितः। अस्य कार्यक्रमस्य मुख्यातिथिः डा. राधेश्यामशुक्लः (प्रधानसम्पादकः वार्तासमाचारपत्रस्य) अध्यक्षश्च परिसरप्राचार्यः आचार्यः ए.पि. सच्चिदानन्दमहोदयः आस्ताम्। मुख्यातिथिः राजभाषायाः हिन्द्याः महत्त्वस्य प्रचारस्य च विषये अभाषत। परिसरप्राचार्यस्य अध्यक्षीयभाषणान्तरं सांस्कृतिककार्यक्रमाः आयोजिताः अभवन्। डा. सोमनाथ-साहुः डा. रेखापाण्डेयः च कार्यक्रमस्यास्य संयोजकौ आस्ताम्। कार्यक्रमेऽस्मिन् सर्वेऽपि पुरस्काराः नवदेहलीस्थ-श्रीओमप्रकाशगुप्तावर्यस्य सौजन्येन प्रदत्ताः अभवन्।

### स्वातन्त्र्यमहोत्सवः

१५.०८.१० दिनाङ्के ६४तमः स्वातन्त्र्यमहोत्सवः शृङ्गेरीपरिसरे अनुष्ठितः। परिसरप्राचार्यः आचार्यः ए.पि. सच्चिदानन्दमहाभागः राष्ट्रध्वजारोहणम् अकरोत्। उपस्थिताः सर्वे राष्ट्रगीतम् अगायन्। तदनु आयोजिते कार्यक्रमे परिसरछात्राः राष्ट्रभक्तिगीतानि अगायन्त, राष्ट्रभक्त्यात्मकं रूपकं च अभिनीतवन्तः। परिसरप्राचार्येण स्वीये अध्यक्षभाषणे स्वातन्त्र्यसमरसेनानिभिः स्वतन्त्रताप्राप्त्यै विहितः त्यागः समुपस्थापितः। शारीरिकप्रशिक्षकेन श्री एच्.डि. रामचन्द्रमहोदयेन, वेदान्तप्राध्यापकेन डा. भगवानसामन्तरायमहोदयेन च कार्यक्रमः सुसञ्चालितः।

### शारदाविशिष्टव्याख्यानमालायाः द्वितीयं व्याख्यानम्

२७.०८.२०१० दिनाङ्के शारदाविशिष्टव्याख्यानमालायाः द्वितीयं व्याख्यानं नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य सर्वदर्शनविभागस्य आचार्येण डा. हरेरामत्रिपाठिवर्येण 'मोक्षे व्याप्तिज्ञानस्य उपयोगिता' इति विषये विहितम्। परिसरप्राचार्यः आध्यक्ष्यं निरवहत्। डा. नवीनहोल्लमहोदयेन स्वागतभाषणम् अभ्यागतानां परिचयश्च कृतः। श्रीकृष्णानन्तपद्मनाभमहोदयेन कार्यक्रमः सञ्चालितः।

### शिक्षकदिवसः

ऐषमः शिक्षकदिवसः ०६.०९.१० दिनाङ्के समाचरितः। अवसरेऽस्मिन् शृङ्गेरीस्थ-जे.सि.सि. विद्यालयीयसंस्कृताध्यापकाय श्रीमते ए.के. सन्तोषकुमार्महोदयाय एवं उडुपिस्थ-पेर्डूरु-उन्नतपाठशालीय-संस्कृताध्यापकाय श्रीमते जि.पि. प्रभाकराय च 'शिक्षकप्रवरः' इति बिरुदं प्राचार्येण प्रदत्तम्। बिरुदं स्वीकृत्य भाषमाणः श्रीमान् ए.के. सन्तोषकुमारवर्यः 'छात्राध्यापकैः माणवकैश्च स्वाध्याये समयपालने आङ्गिकभाषायां च अवश्यं श्रद्धा देया' इति अवदत्। श्रीमान् जि.पि. प्रभाकरवर्यश्च स्वकीयभाषणे 'छात्रैः स्वीयमूल्याङ्कनम् असकृत्करणपूर्वकं प्रगत्यै प्रयत्नो विधेयः, आधुनिकवार्ताप्रसारणोपकरणानाम् उपयोगश्च स्वाध्याये अवश्यं कार्यः' इति अकथयत्। तदनु छात्रैः गुरुवन्दनमाचरितम्। प्राचार्येण स्वाध्यक्षभाषणे राष्ट्रपतिचरस्य डा. राधाकृष्णन्-महोदयस्य कीर्तिकथनपूर्वकं, छात्रैरपि तन्मार्गो अनुसर्तव्यः इति भणितम्। डा. सोमनाथसाहुमहोदयः अभ्यागतानां परिचयदानपूर्वकं स्वागतभाषणम् अकरोत्। डा. ओ.आर्. विजयराघवमहोदयः धन्यवादानर्पयत्। डा. हरिप्रसाद् के. महोदयेन कार्यक्रमः सञ्चालितः।

### भारतीयविवाहपद्धति-भारतीयौषधविज्ञानविषययोः संवादगोष्ठी

१७.०९.२०१० दिनाङ्के भारतीयविवाहपद्धतिविषयिणी संवादगोष्ठी सञ्चालिता, यत्र परिसरीयमीमांसाप्राध्यापकः डा. सूर्यनारायणभट्टः स्मृतीनामुद्धरणपूर्वकं प्राचीनभारतीयविवाहपद्धतिविषयकं प्रस्तावम् अकार्षीत्। न्यायवादिना श्रीमता जि.एम्. सतीशमहोदयेन आधुनिकभारतीयविवाहसम्बद्धनियमाः समुल्लिखिताः। तत्र डा. हरिप्रसाद के. महोदयः स्वागतं व्याहरत्, डा. राघवेन्द्रभट्टश्च धन्यवादं प्राकटयत्। भारतीयौषधविज्ञानसम्बन्धिनी संवादगोष्ठी अपि सञ्चालिता। कोप्पास्थ-आयुर्वेदमहाविद्यालयस्य उपप्राचार्यः डा. दिनेशकुमारमिश्रः आयुर्वेदस्य उत्पत्तिं तत्सिद्धान्तान् चाधिकृत्य भाषणम् अकरोत्। निवृत्तवैद्याधिकारिणा डा. नागेन्द्रशेट्टिवर्येण आयुर्वेद-एलोपैथिपद्धत्योः स्पर्धाविषयकं भाषणं कृतमासीत्। वेदान्तप्राध्यापकेन डा. भगवान्सामन्तरायमहोदयेन आयुर्वेदस्य दर्शनत्वम् इति विषयमधिकृत्य उपन्यासः प्रस्तुतः। प्राचार्येण स्वाध्यक्षभाषणे भारतीयवैद्यविज्ञानं सकलशास्त्रसम्बद्धमिति प्रतिपादितम्। विना शास्त्रज्ञानं आयुर्वेदस्य सम्पूर्णं तत्त्वं नावगन्तुं शक्यते इत्यपि स अवदत्। डा. राघवेन्द्रभट्टः स्वागतमाविरकरोत्। डा. हरिप्रसादेन धन्यवादः प्रकटितः।

# पुरीपरिसरः



वाणीविलासपरिषदः उद्घाटनं कुर्वन् रा. देवनाथः

## वाणीविलासपरिषदः उद्घाटनम्

१२.०८.२०१० तमे दिनाङ्के श्रीसदाशिवपरिसरे 'वाणीविलासपरिषदः' शुभोद्घाटनोत्सवः महता वैभवेन अजायत। संस्थानस्य कुलसचिवः प्रो. रामानुजदेवनाथन्-वर्यः मुख्यातिथिभाषणं कुर्वन् कथितवान् यत् 'एषः परिसरः साधनाभूतं पुण्यपीठं वर्तते। अत्रत्याः तपश्चराः छात्राः यत्र क्वापि यान्ति विजयमण्डिताः भवन्ति। वाणीविलासपरिषदः संस्थापनेन छात्राणां वाणी अवश्यं मुखरिता भविष्यति' इति। परिसरप्राचार्यस्य प्रो. जि. गङ्गन्नामहाभागस्य आध्यक्ष्ये समायोजितायां सभायां वाणीविलासपरिषदः संयोजकः डा. सुकान्तकुमारसेनापतिः परिषदः ऐषमः शैक्षणिकवर्षस्य कार्यक्रमविवरणीं प्रस्तुतवान्। सम्मानितातिथित्वेन श्रीजगन्नाथसंस्कृतविश्व-विद्यालयस्य वेदान्तविभागाध्यक्षः प्रो. प्रभातरञ्जनमहापात्रः 'शास्त्रीयपरम्परायां नैपुण्यमर्जयितुं वाणीविलासपरिषद् प्रमुखं साधनं भविष्यतीति' न्यगदत्। परिषदः अन्यतमसंयोजकः प्रो. हरेकृष्णमहापात्रः सभासञ्चालनं, डा. के.वी. सोमयाजी मङ्गलाचरणं, प्रो. के.वि. सुब्बारायुडुः स्वागतभाषणं, प्रो. अतुलकुमारनन्दः धन्यवादार्पणं च कृतवन्तः।

## विशिष्टव्याख्यानमाला

३०.०७.२०१० तमे दिनाङ्के विशिष्टव्याख्यानमालायाः प्रथमपुष्पं शिक्षाशास्त्रे अजायत। शैक्षिकवर्षस्यास्य प्रथमव्याख्यानं तिरुपतिविद्यापीठस्य शिक्षासङ्कायस्य प्रो. रविशङ्करमेनोनवर्यः अकरोत्। परिसरप्राचार्यस्य प्रो. जि. गङ्गन्नावर्यस्याध्यक्ष्ये समायोजितायां सभायां डा. मदनमोहनझा स्वागतं व्यदधात्। कार्यक्रमसञ्चालनं डा. रमाकान्तमिश्रेण अकारि।

## सम्भाषणशिबिरम्

१३.०७.२०१० तः २३.०७.२०१० पर्यन्तं संस्कृतभारतीपक्षतः शिक्षाशास्त्रिच्छात्राणां कृते त्रिषु गणेषु पृथक् पृथक् सम्भाषणशिबिरं समायोजितम् अभवत्। श्रीमुरलीकृष्णन्, स्वर्णप्रभारथः, अजितकुमारराणा च शिबिराण्येतानि अचालयन्। शिबिरमध्ये एव संस्कृतभारत्याः अखिलभारतसङ्घटनमन्त्री छात्रेषु संस्कृतविषयिणीं रुचिं संवर्धयितुं मार्गदर्शनमकरोत्। समापनसमारोहे सङ्गोष्ठ्याश्च उद्घाटने श्रीनन्दकुमारमहोदयः ओजस्विपूर्णभाषणेन छात्राणां मनांसि संस्कृतोत्साहं समवर्धयत्।

## वृक्षारोपणम्

१०.०९.२०१० तमे दिनाङ्के परिसरप्राचार्यस्य, अध्यापकानां छात्राणां च उपस्थितौ तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. हरेकृष्णशतपथी वृक्षरोपणं कुर्वन् वृक्षाणामुपादेयताविषये उपस्थितान् सर्वान् उदबोधयत्।

## हिन्दीपक्षपालनम्

१४.०९.२०१० तः ३०.०९.२०१० पर्यन्तं हिन्दीपक्षपालनमभवत्। एतदङ्गभूततया भाषणप्रतियोगिता, निबन्धलेखनप्रतियोगिता, वादविवादः, स्वरचितकवितापाठः इत्यादयः अनेके कार्यक्रमाः आयोजिताः। ३०.०९.२०१० तमे दिनाङ्के आयोजिते समापनसमारोहे आइ.पि.एस्. अधिकारी श्री अरुणकुमार-उपाध्यायः मुख्यातिथित्वेन हिन्दीभाषायाः प्रचारप्रसारोपायान् समसूचयत्। कार्यक्रमेऽस्मिन् अध्यक्षः प्रो. जि. गङ्गन्नावर्यः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य व्याकरणविभागाचार्यः प्रो. तेजपालशर्मा संयोजिका डा. केतकीमहापात्रः च मञ्चे उपस्थिताः आसन्।




## अन्ताराष्ट्रियसङ्गोष्ठी

सितम्बर्-मासस्य २४,२५,२६ मितेषु दिनाङ्केषु महामहोपाध्यायस्य पण्डितहरिहर-महापात्रस्य स्मृतौ एका अन्ताराष्ट्रियसङ्गोष्ठी परिसरेऽस्मिन् समनुष्ठिता। जगन्नाथचेतना-जागतीकरणम् इत्यस्मिन् आलोचनाचक्रे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. नीलकण्ठपतिः, श्रीसदाशिवपरिसरस्य प्राचार्यः प्रो. जि.गङ्गन्ना, फकीरमोहनविश्वविद्यालयस्य कुलपतिः प्रो. सुकान्तीप्रियापट्टनायकः, गौहाटीविश्वविद्यालयस्य आचार्यः सत्येन्द्रनारायण-गोस्वामी, किट्-विश्वविद्यालयस्य कुलसचिवः डा. सत्येन्द्रपट्टनायकः चेत्यादयः अनेके विद्वांसः श्रीजगन्नाथसंस्कृतौ विद्यमानवैशिष्ट्यविषये स्वविचारान् प्रास्तुवन्। तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. हरेकृष्णशतपथी कार्यक्रमममुम् उद्घाटयत्। राज्यसभासदस्यः सांसद् रामचन्द्रखुण्टिआ मुख्यातिथित्वेन उपस्थितः आसीत्।


















## समायोक्ष्यते कौमुदीमहोत्सवः

राष्ट्रियसंस्कृतसंस्थानस्य कौमुदीमहोत्सवाचरणस्य गौरवशालिनी परम्परा पूर्ववदेव अस्मिन्नपि वर्षे इतोऽपि भव्यतया अनुवर्तिष्यते। संस्कृतवाङ्मये नाट्यविधा विशिष्टं स्थानं बिभर्ति। तत्र च संस्कृतनाट्यपरम्परायां प्रथमनाट्यकारस्य भासस्य विशेषः सम्मानः वर्तते। २०१० तमः वर्षः भासरूपकाणां पाण्डुलिपीनां पुनराविष्कारस्य शताब्दीवर्षोऽपि विद्यते। अतोऽस्मिन् वर्षे कौमुदीमहोत्सवः नाट्यकारस्य भासस्य रूपकेषु एव केन्द्रितो भविष्यति इति कश्चन आनन्दविषयः।

२५-२७ अक्टूबर, २०१० मिते काले कौमुदीमहोत्सवाङ्गतया अन्तःपरिसरीया संस्कृतनाट्यस्पर्धा नवदेहलीस्थ-लिटिल् थियेटर् ग्रुप् (एल्.टी.जी.) इति प्रेक्षागृहे (कापरनिकस्-मार्गः इत्यत्र) भविष्यति। महोत्सवेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य १० परिसरेभ्यः तत्रत्यच्छात्रैः नाट्यप्रस्तुतयः संस्कृतेन प्रदर्शयिष्यन्ते। परिसरप्रस्तुतयः अतिरिच्य देहलीस्थ-प्रसारभारतीसंस्था अपि ऊरुभङ्गं प्रदर्शयिष्यति।

अस्य कौमुदीमहोत्सवस्य उद्घाटनसमारोहः २५ अक्टूबर, २०१० दिनाङ्के प्रातः ११.०० वादने भविष्यति। मुख्यातिथित्वेन श्रीमती डा. कपिला वात्स्यायनवर्या (राज्यसभासदस्या, कला-इतिहासज्ञा, विदुषी एवञ्च अध्यक्षा, आई.आई.सी. एशिया प्रोजेक्ट्) अध्यक्षत्वेन आचार्यः राधावल्लभः त्रिपाठी (कुलपतिः राष्ट्रियसंस्कृतसंस्थानम्) च भविष्यतः।

२७ अक्टूबर, २०१० मिते दिनाङ्के पुरस्कारवितरणसमारोहे अहमदाबादस्थ-सोमनाथसंस्कृतविश्व-विद्यालयस्य कुलपतिः आचार्यः पङ्कज एल्. जानी मुख्यातिथिरूपेण नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभः त्रिपाठी च अध्यक्षरूपेण भविष्यतः। संस्थानपरिवारः कार्यक्रमेऽस्मिन् समागन्तुं सर्वान् सादरं निवेदयति।

**भासरूपकपाण्डुलिपिपुनराविष्कारशताब्दीवर्षम् २०१०**

**कार्यक्रमविवरणमित्थमस्ति-**

### २५.१०.१० सोमवासरः

| | | |
|---|---|---|
| पूर्वाह्णे ११.०० - १२.०० | उद्घाटनसमारोहः | |
| पूर्वाह्णे १२:००-१:०० | कर्णभारम् | गुरुवायूर्परिसरः, केरलप्रदेशः |
| अपराह्णे २:३०-३:३० | मध्यमव्यायोगः | जयपुरपरिसरः, राजस्थानम् |
| ४:००-५:०० | पञ्चरात्रम् | के.जे. सोमैया सं.वि.पी., मुम्बई, महाराष्ट्रम् |
| ५:००-५:३० | नाट्यदलानां कृते विशेषज्ञानाम् उद्बोधनम् | |
| ५:३०-७:०० | ऊरुभङ्गम् (आमन्त्रितप्रस्तुतिः) | कमलिनीदत्तः, निदेशिका, दूरदर्शनाभिलेखागारः, प्रसारभारती, नवदेहली |

### २६.१०.२०१० मङ्गलवासरः

| | | |
|---|---|---|
| पूर्वाह्णे १०:३०-११:३० | प्रतिज्ञायौगन्धरायणम् | भोपालपरिसरः, मध्यप्रदेशः |
| १२:००-१:०० | दूतवाक्यम् | गङ्गानाथझापरिसरः, इलाहाबाद्, उत्तरप्रदेशः |
| अपराह्णे २:३०-३:३० | दरिद्रचारुदत्तम् | गरलीपरिसरः, हिमाचलप्रदेशः |
| ४:००-४:३० | नाट्यदलानां कृते विशेषज्ञानाम् उद्बोधनम् | |
| ४:३०-५:३० | स्वप्नवासवदत्तम् | राजीवगान्धीपरिसरः, शृङ्गेरी, कर्णाटकम् |

### २७.१०.१० बुधवासरः

| | | |
|---|---|---|
| पूर्वाह्णे १०:३०-११:३० | बालचरितम् | श्रीसदाशिवपरिसरः, पुरी, उत्कलप्रदेशः |
| १२:००-१:०० | अविमारकम् | लखनऊपरिसरः, उत्तरप्रदेशः |
| अपराह्णे २:३०-३:३० | प्रतिमानाटकम् | रणवीरपरिसरः, जम्मू, जम्मू-कश्मीरम् |
| ४:३०-६:३० | पुरस्कारवितरणसमारोहः | |











Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.III Issue No.9 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007